॥अथवेदांतसारप्रारंभः॥पत्र७॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥ब्रह्मानंदंगुरुंनत्वापरमानंदमद्वयं॥वक्ष्येवेदांतसारस्यदीकांनाम्ना
सुबोधिनीं॥१॥इहखलुकश्चिन्महापुरुषोनित्याध्ययनविध्यधीतसकलवेदराशीनांचि
न्मात्राश्रयतद्रूपाद्वयानंदविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलसितानंतभ
वानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्मभिःसम्य
क्प्रसन्नेश्वराणामिष्टिकाचूर्णादिसंघर्षितादर्शतलवदति निर्मलान्तरायानांनलि
नीदलगतजलबिंदुवद्दिरण्यगर्भादिस्तंबपर्यंतंजीवजातंस्वात्मवन्मृत्योरास्यांत
र्गतंक्षणभंगुरंनापत्र्यात्मिसंदृश्यमानमनित्यात्मन्यनुपश्यन्नतिविवेकि
नामतएवेहिकस्त्रक्चंदनादिविषयभोगेभ्यःआमुष्मिकहैरण्यगर्भाद्यमृतभोगे
भ्यश्चवीतस्पृहवअतिनिर्विण्णमानसानांशमादिसाधनसंपन्नानामापाततोधि

गताखिलवेदार्थत्वाद्देहाद्यहंकारपर्यंतंजडपदार्थतद्विलक्षणस्वप्रकाशस्वरूप
त्यगात्मनिब्रह्मानंदतेसंशयापन्नानांतज्जिज्ञासूनांश्रुत्यश्रवणेनमूलाज्ञाननिष्ट
त्तिपरमानंदावाप्तिसिद्ध्येप्रकरणमारभमाणःतत्समाप्तिप्रचयगमनादिफलक
शिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारलक्षणमंगलाचरणस्यावश्यकर्त्तव्यतांप्र
दर्शयन्लक्षणयाभेदबंधचतुष्टयंचनिरूपयन्परमात्मानंनमस्करोति॥अ
खंडमित्यादिना॥ ॥अखंडंसच्चिदानंदमवाङ्मनसगोचरं॥आत्मानमखिलाधार
माश्रयेभीष्टसिद्धये॥१॥ ॥अभीष्टस्यनिःश्रेयसस्यसिद्धयेप्राप्त्यर्थंआत्मानंआश्र
येआकलयेनप्रति पद्यइत्यर्थः॥नन्वविषयस्यात्मनःकथंप्रतिपत्तिरित्याशंक्याहाअ
खिलाधारमिति॥अखिलस्यचराचरात्मकप्रपंचस्यविवर्त्ताधिष्ठानत्वेनकारणत्वात्को

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तंत्रत्वेवप्रतिपद्येनतुशुद्धमित्यर्थः॥नन्वेवंचसत्प्रत्तिपत्तिविषयत्वेनदृश्यत्वा
त्तिमान्शंक्याह॥अवाङ्मनसगोचरंइति॥यतोवाचोनिवर्त्तंतइत्यादिश्रुतिनिरविष
यत्वप्रतिपादनात्प्रतिपत्तिविषयत्वंकारणत्वोपलक्षितब्रह्मविषयत्वेनौपचारिक
मितिभावः॥ननेवमपिकारणत्वेमृत्पिंडवदनित्यत्वंशंकामपहरन्नाह॥सद्दि
ति॥नात्माभावोपलब्धिस्वरूपं॥सदेवसोम्येत्यादिश्रुतेः॥ननुतथापिजडत्वापत्ति
माशंक्याहचिदिति॥स्वप्रकाशचैतन्यस्वरूपमितियावत्॥ननुतथाप्यपुरुषार्थ
त्वात्॥किमित्याश्रयणीयमित्यतआह॥आनंदमिति॥परमानंदरूपमित्यर्थः॥न
नुभक्षितेपित्तशमनेनशांतोव्याधिरितिन्यायेनब्रह्मपंचस्याधिष्ठानव्यतिरिक्तयाब्र
ह्मीयमानत्वात्कथमद्वैतसिद्धिरित्याशंकांत्वणीकुर्वन्नाह॥अखंडमिति॥सज्जाती

२

यविजातीयस्वगतभेदशून्यमित्यर्थः॥अत्रसच्चिदानंदमितिप्रयोजनं॥अखंडमि
तिविषयः॥शास्त्रविषययोःप्रतिपाद्यप्रतिपादकभावःसंबंधः॥तत्कामःअधि
कारीत्यनुबंधचतुष्टयमर्थादुक्तंभवति॥किंच॥यस्यदेवेपराभक्तिर्यथादे
वेतथागुरौ॥तस्येतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यादिश्रुत्यागुरुन
मस्कारस्यापिशास्त्रांगत्वप्रतिपादनायनमस्कारोऽपिष्टथक्केनकार्यइतितन्नतिर्व
कमभिधेयग्रंथंप्रतिजानीते॥अथतइति॥॥अथतोऽद्वैतानंदानवाप्तये॥तद्धेतभान
तः॥गुरूनाराध्यवेदांतसारंवक्ष्येयथामति॥१॥॥अपिनाडिल्लादिवत्संज्ञामा
त्रंव्यवक्रियते॥सनकेवलंशास्त्रतः॥अर्थतःशास्त्रतश्चेति॥अद्वयानंदान्गुरू
नाराध्यवेदांतसारंयथामतिवक्ष्यइत्यन्वयः॥अद्वयश्चासावानंदस्तान्अद्वया

नंदान॥बहुवचनंपूजार्थंतत्रहेतुमाह॥अतीतहेतभाननइति॥अतीतंगतंहेतभा
नंयतस्तस्मादतीतहेतभाननः॥निरस्तसमस्तभेदज्ञानत्वादित्यर्थः॥तान्गुरून्
राध्यकायवाङ्मनोभिर्नमस्कारगोचरीकृत्यवेदांतसारंवेदांतानामुपनिषद्वाक्य
जातानांमध्येयत्सारंसिद्धांतरहस्यं॥यस्मिन्ज्ञातेपुनःज्ञातव्यंनावशिष्यते॥तंवे
दांतसारंयथामतिबुभुत्सितमतिक्रम्यवक्ष्यइतिपादयिष्यइत्यर्थः॥२॥॥इदानींसर्व
स्यापिवस्तुविचारोहिश्रवणपूर्वकत्वात्प्रतिज्ञातंवेदांतनामतोनिर्दिशति॥॥वेदांतो
नामोपनिषत्प्रमाणंतदुपकारीणिशारीरकसूत्रादीनिच॥॥शरीरमेवशारीरकं
तत्रभवोजीवः॥शारीरकःसमुच्यतेयाथातथ्येननिरूप्यतेयैस्तानिशारीरकसूत्रा ३
णि॥अथातोब्रह्मजिज्ञासेत्यादीनि॥यद्वा॥शारीरकसूत्राणितद्व्याख्यावादिवेदांता

र्थसंग्रहवाक्यानिआदिशब्दोभाष्यादिसंग्रहार्थः॥चशब्दोवेदांतशास्त्रानुषंगार्थः
॥उपनिषदेवप्रमाणंउपनिषत्प्रमाणंउपनिषदोयत्रप्रमाणमितिवा॥तदुपका
रीणिवेदांतवाक्यसंग्रहकाणिशारीरकसूत्रादीनिअथातोब्रह्मजिज्ञासाइत्या
दीनि॥आदिशब्देनभगवद्गीताद्यध्यात्मशास्त्राणिगृह्यंतेतेषामपिउपनिष
च्छब्दवाच्यत्वादितिभावः॥ननुयद्यपिअवांतरानुबंधचतुष्टयमापद्येतेतिनिर्दि
ष्टं॥तथापिपरमानुबंधचतुष्टयस्यानिरूपितत्वात्तत्रेक्षावतांप्रवृत्तिर्नस्यादि
त्यतआह॥॥अस्यवेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्ग्रासिद्धेर्ननेष्यथ
गसोचनीयाः॥वेदांतसारस्येत्यर्थः॥ननुवेदांतशास्त्रस्यापिकिंअनुबंधचतु
ष्टयंयेनास्यापितद्ग्रासिद्धिरित्याशंक्यमूलशास्त्रस्यानुबंधचतुष्टयमावि क

रोति॥तत्रानुबंधोनाम॥अनुबंधचतुष्टयमेवाह॥अधिकारीविषयसंबंधप्रयो
जनानि॥यद्योद्देशमधिकारिणंलक्षयति॥अधिकारीतु॥विधिवदधीतवेदवेदां
गत्वेनापाततोधिगताखिलवेदार्थोस्मिन्जन्मनिजन्मांतरेवाकाम्यनिषिद्धवर्जी
नपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेननिर्गतनिखिलकल्म
षतयानितांतनिर्मलस्वांतःसाधनचतुष्टयसंपन्नःप्रमाता॥स्वाध्यायोध्येतव्यइति व
चनात्त्रैवर्णिकानामुपवीतानामध्ययनंनियमेनविधीयते॥अध्ययनविधिप्र
युक्तमेवाध्ययनंनाध्यापनंविधिप्रयुक्तं॥तथाच॥अधीत्यवेदंवेदांगानिच॥शिक्षा
कल्पव्याकरणछंदोज्योतिर्निरुक्तान्यपि॥येनतेनापाततोधिगताखिलवेदार्थ
श्च॥अत्रसर्ववेदार्थरहस्यज्ञातेसतिउत्तरग्रंथवैयर्थ्यपरिहारायआपाततश्च

र्कं॥ननुनधीतवेदानामपिविदुरादीनांतत्त्वज्ञानोत्पत्तिदर्शनादध्ययनत्वप्रयुक्त
कर्मानुष्ठानवैयर्थ्यमाशंक्योत्तरमाह॥जन्मांतरइति॥तेषामाधुनिकाध्ययनाद्यभा
वेऽपिजन्मांतरीयाध्ययोदिनाचित्तपरिपाकवतोऽस्मिन्जन्मनिविनाप्यध्ययना
दिनाज्ञानोत्पत्तौबाधकाभावान्नाध्ययनादिवैयर्थ्यमितिभावः॥काम्येति॥काम्यस्या
पिकर्मणःधर्मसाधनत्वेपियातायातसंपादकत्वेनबंधकत्वान्निषिद्धवत्तद्वर्जन
पुरःसरमित्युक्तं॥तथाच॥नित्यादिकर्मानुष्ठानेननिर्गतनिखिलकल्मषतयानि:
शेषनिरस्तसकलकल्मषत्वेन॥अत्रनिखिलपदंकाम्यनिषिद्धजनितसुकृतदुः
कृतपरंतेननितांतनिर्मलस्वांतःनितांतमत्यंतंनिर्मलंस्वच्छंस्वांतमंतःकरणंयस्य
सः॥तथोक्तः॥वक्ष्यमाणसाधनचतुष्टयसंपन्नःप्रमाता॥अंतःकरणेप्रतिबिंबि

तंचैतन्यमित्यर्थः॥एतदेवस्पष्टं व्याकरोति॥काम्यानिस्वर्गादिदृष्टसाधनानिज्योतिष्टो
मादीनि॥निषिद्धानिनरकाद्यनिष्टसाधनानिब्राह्मणहननादीनि नित्यान्यकर
णेप्रत्यवायसाधनानिसंध्यावंदनादीनि॥नैमित्तिकानिपुत्रजन्माद्यनुबंधीनिजा
तेष्ट्यादीनि॥प्रायश्चित्तानिपापक्षयसाधनानिकृच्छ्रचांद्रायणादीनि॥उपासना
निसगुणब्रह्मविषयमानसव्यापाररूपाणि॥ज्योतिष्टोमविद्यादीनि॥एतेषांनित्या
दीनांबुद्धिशुद्धिःपरंप्रयोजनं॥उपासनानांतुचित्तैकाग्र्यं॥तमेतंवेदानुवचने
नब्राह्मणाविविदिषंतियज्ञेनेतिश्रुतेः॥तपसाकल्मषंहंतिदुरितस्मृतेश्च॥नित्यनै
मित्तिकप्रायश्चित्तोपासनानांतुश्वांतरफलंपितृलोकसत्यलोकप्राप्तिः॥कर्म
णापितृलोकोविद्ययादेवलोकइत्यादिश्रुतेः॥साधनानि॥नित्यानित्यवस्तुविवेकोहा

मुत्रार्थफलभोगविरागश्चमदमादिषट्संपत्तिमुमुक्षुत्वानि॥नित्यानित्यवस्तुविवे
कस्तावत्॥ब्रह्मैवनित्यंवस्तुततोन्यदखिलमनित्यमितिविवेचनं॥ऐहिकानांस्त्रक्
चंदनादिविषयभोगानांकर्मजन्यतयाऽनित्यत्वात्॥आमुष्मिकाणामपिस्वर्गा
नादिविषयभोगानामनित्यतयातेभ्योनितरांविरतिः॥इहामुत्रफलभोगविरा
गश्चमदमादय
स्तुश्चमदमउपरतितितिक्षासमाधानश्रद्धाख्याः॥तत्रश्चमंलक्षयति॥श्चमस्तावत्
श्रवणाद्यतिरिक्तविषयेभ्योमनसोनियहः॥यथातीव्रायांबुभुक्षायांभोजना
दन्योव्यापारोमनसोनरोचतेभोजनेविलंबंचनसहते॥तथास्त्रक्चंदनादिविषये
ष्वत्यंतमरुचिः॥तत्त्वज्ञानसाधनेषुश्रवणमननादिष्वत्यंतमभिरुचिर्जायते॥
॥तदाऽर्ववासनाब[redacted]गछन्

मनोयेनांतःकरणविशेषेण निवर्त्तनेसहत्तिविशेषःशमइत्यर्थः॥इदानीदमस्यल
क्षणमाह॥दमोबाह्येंद्रियाणांतद्व्यतिरिक्तविषयेभ्योनिवर्त्तनं॥ज्ञानसाधनश्रवणा
दिसाधनेभ्योविलक्षणेषुशब्दादिविषयेषुप्रवर्त्तमानानिश्चात्रादीनिबाह्येंद्रिया
णियेनवृत्तिविशेषेणनिवर्त्त्यंतेसदमइत्यर्थः॥इदानींउपरतेर्लक्षणमाह॥॥
निवर्त्तितानांतेषांतद्व्यतिरिक्तविषयेभ्यःउपरमणमुपरतिः॥॥निगृहीतानामेव
तेषांबाह्येंद्रियाणांश्रवणादिसाधनव्यतिरिक्तेषुशब्दादिविषयेषुयथानांनींद्रिया
णिसर्वथानगछंतितथातेषांनियहोयेनवृत्तिविशेषेणक्रियतेसोपरतिरित्यर्थः॥
॥उपरतेर्लक्षणांतरमाह॥अथवाविहितानांकर्मणांविधिनापरित्यागः॥विहिता
नांनित्यादिकर्मणां विधिनाचतुर्थाश्रमस्वीकारकर्मणापरित्यागः।नाहंकर्त्तेत्यवस्था

नमुपरतिरित्यर्थः॥तितिक्षायालक्षणमाह॥तितिक्षाशीतोष्णादिद्वंद्वसहिष्णुता॥श
रीरधर्मस्यशीतोष्णादेस्तज्ज्ञान्यसुखदुःखादेश्चशरीरस्यत्यक्तुमशक्यत्वात्स्वप्न का
शविद्रूपेस्वात्मनिचशीतोष्णादेरत्यंताभावादितिविवेकदीपेनमिथ्याभानस्यशी
तोष्णादेर्द्वंद्वस्ययत्सहनंसातितिक्षेत्यर्थः॥इदानींसमाधानलक्षणमाह॥॥निगृही
तस्यमनसःश्रवणादौतदनुगुणविषयेचसमाधिःसमाधानंशब्दादिविषयेभ्यो
निगृहीतस्यांतःकरणस्यश्रवणादौतदनुगुणेषुचतदुपकरणेषुचश्रमानिवादिसा
धनविषयेषुसमाधिनैरंतर्येणतच्चिंतनंसमाधानमित्यर्थः॥श्रद्धादयः॥स्पष्टार्थाः
॥गुरुवेदांतवाक्येषुविश्वासःश्रद्धा॥मुमुक्षुत्वंमोक्षेच्छा॥एवंभूतःप्रमाताऽधिकारी॥
तथाचपूर्वोक्तसकलविशेषण विशिष्टःप्रमाताऽधिकारीत्यर्थः॥अस्मिन्नर्थेश्रुतिंप

गताज्ञाननत्कार्यसकलप्रपंचनिवृत्तिः॥पुनरुत्पत्त्यभावरूपस्वस्वरूपाखंडानं दप्राप्तिःफलमित्यर्थः॥ननुलोकेऽप्राप्तस्यक्रियासाध्यस्यस्वर्गादेःपुरुषार्थत्वेनफल त्वंदृष्टं॥अत्रतुनित्यप्राप्तस्यात्मस्वरूपस्यक्रियासाध्यत्वाभावेनपुरुषार्थत्वाभावा त्कथंफलत्वमितिचेन्नानर्थनिवृत्तेरेवपुरुषार्थत्वनियमाभावात्॥यथालोकेकस्यचि द्विस्मृतकंठमणेस्तत्प्रयुक्तशोकाभिहन्यमानस्याप्तोपदेशोत्तरकालंस्वकं वगतचामीकरप्राप्तेरपिपुरुषार्थत्वात्फलत्वदृष्टेः॥एवमत्रापिनित्यप्राप्तस्यात्म नःअज्ञानमोहांधकाराचृतत्वेनविस्मृतस्वरूपस्यपुरुषस्यगुरुश्रुतिवाक्यश्र वणानंतरंअज्ञानमोहांधकारनिवृत्तौसत्यांस्वयंप्रकाशमानचिद्रूपस्यसिद्धस्ये वात्मनःफलत्वमुपचर्यतइतिभावः॥उक्तेर्थेश्रुतिंप्रमाणयति॥तरतिशोकमात्म

वित्ब्रह्मवित्ब्रह्मैवभवतीत्यादिश्रुतेः॥अधुनाशास्त्रारंभनिमित्ताधिकार्यादिनि
रूपणानंतरंशास्त्रारंभंप्रस्तौति॥अथवालक्षितस्याधिकारिणःकर्तव्यंदर्शयति॥
॥॥अयमधिकारीजननमरणादिसंसारानलसंतप्तोदीप्तत्रिराजत्तरात्रिमिवो
पहारपाणिःश्रोत्रियंब्रह्मनिष्ठंगुरुमुपसृत्यतमनुसरति॥॥उक्तलक्षणलक्षितो
बुद्धिसन्निहितोधिकारीगुरुमुपसरतीत्यर्थः॥ननुसंसारासक्तस्यविषयलो
लुपस्यात्तिरहितस्यगुरूपसर्पणमयुक्तमित्याशंक्याह॥संसारानलसंतप्त इ
ति॥संतापेहेतुमाह॥जननेति॥आदिग्रहेनव्याध्यादयोगृह्यंते॥यतिदग्धम
स्तकोदाहनिहत्तिकामोमोयथाशीतलंजलराशिमनुसरति॥तथासंसारतापत्र
यदह्यमानस्तन्निहत्तिकामःस्वस्वरूपजिज्ञासुःसंसारनिवर्तकंश्रोत्रियंब्र ह्म

निष्ठंकरतलामलकवत्स्वकात्मस्वरूपसमर्पकंगुरुंसमीपंगत्वाअनुसर
सि॥मनोवाक्कायकर्मभिःसेवतइत्यर्थः॥अस्मिन्नर्थेश्रुतिमुदाहरति॥समित्पाणिः
श्रोत्रियंब्रह्मनिष्ठमित्यादिश्रुतेः॥अथगुरुंकृत्यमाह॥तंपरमकृपयाध्यारोपापवा
दन्यायेनएनमुपदिशतीति॥॥सएवंलक्षणोगुरुरेनंशिष्यमुपदिशतीत्यन्वयः॥परमर
हस्यमपिब्रह्मस्वरूपंकस्मादुपदिशतिअतआह॥कृपयेतिकृपाव्यतिरेकेणसा
धनांतराभावादित्यर्थः॥नन्वखंडस्यब्रह्मस्वरूपस्यअगोचरत्वेनउपदेष्टुमशक्य
त्वात्कथमुपदिशतीत्यतआह॥अध्यारोपेति॥अखंडब्रह्मस्वरूपस्यागोचरत्वे
नविधिमुखेनोपदेष्टुमशक्येपिनेहनानास्तिकिंचनेत्यादिश्रुतिमनुसृत्य
अविद्यारोपितमिथ्यानानापदार्थमुखेनोपलक्षितंअखंडचैतन्यमेवपुनःस

त्यज्ञानमनंतंब्रह्मेत्यादिश्रुतिमनुसरत्यलक्षणयाविधिमुखेनाप्युपदिशतीतिभावः॥
तत्रश्रुतिमाह॥ ॥तस्मैसविद्वानुपसन्नायप्राहेत्यादिश्रुतेः॥अस्मिन्नर्थेलोकिकदृष्टां
तमाह॥असर्पभूतायांरज्वांसर्पारोपवदद्वस्त्वन्यवस्त्वारोप्यारोपः॥यावद्धारिकव
स्तुत्वेनाभिमतरज्वांअवस्तुभूतसर्पारोपोनामरज्ववच्छिन्नचैतन्यस्याविद्यासर्प
ज्ञानाभासाकारेणपरिणममाणसर्पाकारेणवर्त्तते॥सविवर्त्तोरज्ववच्छिन्नचैत
न्यनिष्ठाविद्योपादानत्वेननायंसर्पः किंतुरज्जुरिति॥विशेषदर्शनोत्तरकालीनाधि
ष्ठानरज्जुसाक्षात्कारेणरज्वज्ञाननिवृत्तौसर्पभ्रांतिर्निवर्त्ततइत्यर्थःउक्तमर्थंदृष्टांति
केयोजयति॥ ॥वस्तुसच्चिदानंदानंताद्वयंब्रह्म॥ ॥कालत्रयानपायिआत्मैववस्तु
शब्दार्थः॥तच्चावस्तु रूपमाह॥अज्ञानादिसकलजडसमूहोऽवस्तु॥अज्ञानतज्जन्य

योमादेर्मिथ्यात्वादृश्यत्वांत्सावयवत्वाद्विकारित्वात्सापेक्षसिद्धिकत्वादित्यादिहेतु
भिरवस्तुत्वमित्यर्थः॥एतदेवविस्तरेणप्रतिपादयितुमज्ञानस्वरूपंतावदाह॥ ॥
अज्ञानंतुसदसद्भ्यामनिर्वचनीयंत्रिगुणात्मकंज्ञानविरोधिभावरूपंयत्किंचिदिति व
दंति॥ ॥किमिदमज्ञानंसद्रूपमसद्रूपंवा॥नाद्यः॥तस्यशशविषाणतुल्यत्वेनतुच्छ
त्वात्॥नापिद्वितीयः॥असतःकारणत्वानुपपत्तेरित्यादिहेतुभिःसत्त्वेनअसत्त्वेनवानि
रूपयितुंनशक्यतइत्याह॥अनिर्वचनीयमिति॥ननुज्ञानस्यानिर्वचनीयत्वेसर्वथा
ज्ञातुमशक्यत्वात्तद्भावप्रसंगमाशंक्याह॥त्रिगुणात्मकमिति॥अजामेकामित्या
दिश्रुतिभिःसत्त्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः॥ननेवमजस्याज्ञानस्यश्रुति
प्रसिद्धस्ययोन्यादिरूपेणविततस्यसत्यवद्भासमानत्वेनसंसारनिवृत्तिमाशंक्या

ह॥ज्ञानविरोधिरिति॥एतादृशमप्यज्ञानंआत्मसाक्षात्कारेणनिवर्त्ततइत्यर्थः॥तदुक्तं
भगवता॥दैवीह्येषागुणमयीममायादुरत्यया॥मामेवयेप्रपद्यंतेमायामेतांतर
तिंतेइति॥ज्ञानाभावएवाज्ञानमितितार्किकमतंनिराकरोति॥भावरूपमिति॥त्रि
गुणात्मकभावरूपत्वेपिइदमित्थंमेवेतिपिंडीकृत्यप्रदर्शयितुंनशक्यतइत्याह॥यत्किं
चिदितिकिमप्यघटितघटनापटीयइत्यर्थः॥अनिर्वचनीयानादिभावरूपाज्ञान
सङ्घेअनुभवमेवोदाहृत्यदर्शयति॥॥अहमज्ञइत्यनुभवात्॥॥अहमज्ञोमामन्यं
चनजानामीत्यपरोक्षावभासएवप्रमाणमित्यर्थः॥तस्यैवोपबृंहकत्वेनश्रुतिमुदाह
रति॥॥देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेः॥॥अज्ञानंविभजते॥॥इदमज्ञा
नंसमष्टिव्यष्त्यभिप्रायेणैकमनेकमितिचव्यवह्रियते॥॥वस्तुतोऽज्ञानस्यैकत्वेपिस

मष्ट्यभिप्रायेणैकमितिव्यवह्रियते॥॥व्यष्ट्यभिप्रायेणानेकमित्यर्थः॥एतदेवप्रपंचयि
तुंप्रतिजानीते॥तथाहि॥॥यथावृक्षाणांसमष्ट्यभिप्रायेणवनमित्येकत्वव्यपदेशः॥
यथावाजलानांसमष्ट्यभिप्रायेणजलाशयइति॥॥यथावाबहूनांनद्यादिजलानां
समुदायविवक्षयाजलाशयइत्येकत्वव्यपदेशः॥तथांतःकरणोपाधिभेदेननाना
त्वेनप्रतीयमानानांजीवगताज्ञानानांसमुदायविवक्षयाऽज्ञानमित्येकत्वव्यपदेशः
॥अस्मिन्नर्थेश्रुतिंप्रमाणयति॥अजांमेकामित्यादिश्रुतेः॥नानाजीवगतनिकृष्टांतः
करणव्यष्त्युपाध्यपेक्षयासमष्ट्युपाधेरस्यवैलक्षण्यंदर्शयति॥इयंसमष्टिरुत्कृष्टो
पाधितयाविशुद्धसत्वप्रधाना॥॥विरतरागादिदोषसकलकार्यप्रपंचस्यजगत्का
रणभूतस्यचज्ञानस्यसमष्टिभूतोत्कृष्टोपाधित्वेनविशुद्धसत्वप्राधान्यमितिभावः॥

॥एतत्समष्ट्युपाधिद्वारेणेश्वरचैतन्यंलक्षयति॥ ॥एतदुपहितंचैतन्यंसर्वज्ञत्वस
र्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामीजगत्कारणमीश्वरइतिचव्यप
दिश्यते॥ ॥एतत्समष्त्यज्ञानोपलक्षितंचैतन्यंसर्वस्यचराचरात्मकप्रपंचस्यसा
क्षित्वेनसर्वज्ञइत्युच्यते॥सर्वेषांजीवानांकर्मानुरूपेशित्वेनफलदातृत्वेनेश्व
रइत्युच्यते॥तथासर्वेषांजीवानामंतर्हृदयेस्थित्वाबुद्धिनियामकत्वेनांतर्यामी
त्युच्यते॥सर्वस्यचराचरात्मकप्रपंचस्यविवर्ताधिष्ठानत्वेनजगत्कारणत्व
मितिव्यपदिश्यतइत्यर्थः॥उक्तेर्थेयुक्तिमाह॥सकलाज्ञानावभासकत्वात्॥अ
त्रप्रमाणमाह॥यःसर्वज्ञःसर्वविदितिश्रुतेः॥३॥इदानींतस्यैवेश्वरस्यसमु
दायोपाधिरेवकारणशरीरत्वमानेदमयकोशत्वंसुषुप्त्यवस्थावैशिष्ट्यंचल

भतइत्याह॥ईश्वरस्येयंसमष्टिरखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोश्ञा
वदाच्छादकत्वाच्चानंदमयःकोशः॥कारणशरीरत्वेहेतुमाह॥अखिलेति॥आनंद
मयत्वेहेतुमाहआनंदप्रचुरत्वादिति॥कारणत्वावस्थायांप्रकृतिपुरुषमात्रव्य
तिरिक्तस्यस्थूलसूक्ष्मकार्यप्रपंचस्यैवाभावादानंदबाहुल्यमिति॥कोशत्वेयुक्ति
माह॥कोशवदाच्छादकत्वादितिशरीराच्छादकचर्मवदात्माच्छादकत्वादज्ञानस्य
कोशइतिव्यवहारइत्यर्थः॥ननुतथापिकारणत्वोपाधेरज्ञानस्यसुषुप्तित्वंकुतइ
त्यतआह॥सर्वोपरमत्वात्सुषुप्तिः॥सर्वस्यस्थूलसूक्ष्मोपाधेःकारणोपाधौलीन
त्वात्सुषुप्तित्वमित्यर्थः॥ननुस्थूलसूक्ष्मप्रपंचलयस्थानस्यकथंसुषुप्तित्वमि
त्याशंक्यसंज्ञाभेदइत्याह॥अतएवस्थूलसूक्ष्मप्रपंचस्यलयस्थानमितिचोच्य

ते॥यतः कारणात्सुषुप्तित्वं॥अतएवपंचीकृतभूतस्थूलप्रपंचस्यजाग्रदवस्थावि
शिष्टस्यअपंचीकृतभूतकार्यस्यसूक्ष्मस्याप्रपंचस्यचलयस्थानमित्यपिव्यव
ह्रियतइत्यर्थः॥समष्टिरूपाज्ञानंसप्रपंचंनिरूप्येदानींव्यष्टिभूतमज्ञानंनिरू
पयितुंदृष्टांतौतावदर्शयति॥॥यथावनस्यव्यष्ट्यभिप्रायेणवृक्षाइत्यनेकत्वव्यप
देशः॥॥यथावाजलाशयस्यव्यष्ट्यभिप्रायेणजलानीति॥तथाअज्ञानस्यव्यष्टि
प्रायेणतदनेकत्वव्यपदेशः॥यथाबहुवृक्षसमुदायस्यवनत्वेनरूपेणैकत्वव
हारेपिप्रत्येकवृक्षस्यविवक्षयाचूतादयोबहवोवृक्षास्तिष्ठंतीतिबहुत्वव्यवहारः १२
॥यथावापीकूपतडागादिषुसमुदायविवक्षयाजलाशयइत्येकत्वव्यवहारेपिप्र
त्येकवाप्यादिविवक्षयाबहूनिजलानितिष्ठंतीतिबहुत्वव्यवहारः॥तथासक

लप्रपंचकारणस्याज्ञानस्यसमुदायरूपेणैकत्वेपिअहंकारादिकारणीभूतानां
जीवगताज्ञानानांप्रत्येकविवक्षयाबहुत्वव्यवहारइत्यर्थः॥अस्मिन्नर्थेश्रुतिंप्र
या माणयति॥इंद्रोमायाभिःपुरुरूपईयतेइत्यादिश्रुतेः॥ननुतथापैकस्यैवाज्ञानस्य
तदवच्छिन्नचैतन्यस्यवाव्यष्टिसमष्टिताकुतइत्यतआह॥॥अत्रव्यक्तसमक्तया
पित्वेनव्यष्टिसमष्टितावपदेशः॥॥नेदविवक्षयाव्यष्टित्वंमृद्घटादिवत्॥किंभे
दविवक्षयाचसमष्टित्वंमृत्पिंडवदित्यर्थः॥तत्रमहाप्रलयकालीनसमष्टिभूत
विशुद्धसत्वप्रधानायामूलप्रकृतेःसकाशाद्देनैप्रलयकालीनव्यष्ट्युपाधिभू दि
तजीवप्रकृतेर्भेदंदर्शयति॥॥इयंव्यष्टिर्निकृष्टोपाधितयामलिनसत्वप्रधाना
॥॥इयंजीवगताव्यष्टिःसुषुप्त्यवस्थापन्नाहंकारादिविक्षेपसंस्कारादिरूपानि

कृष्टोपाधित्वेनमलिनसत्त्वप्रधानेत्यर्थः॥अनेनोपाधिनाप्राज्ञचैतन्यंलक्षयति॥ ॥एत
दुपहितंचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकंप्राज्ञइत्युच्यते॥ ॥अत्रोपपत्तिमाह
॥ ॥एकाज्ञानावभासकत्वात्॥ ॥ईश्वरगतमूलाज्ञानस्यजीवगताहंकारादिविक्षेप
संस्कारादिरूपाज्ञानस्यचवस्तुतएकत्वेनतदवभासकेश्वरजीवचैतन्ययोरप्य
कत्वमित्यर्थः॥सोऽप्यजीवचैतन्यस्यप्राज्ञत्वंसाधयति॥अस्यप्राज्ञत्वमस्यदोषा
धितयाअनतिप्रकाशकत्वादस्यापीयमहंकारादिकारणत्वात्कारणशरीर
मानंदप्रचुरत्वकोशवदाछादकत्वादेवदेतोरानंदमयःकोशःसंस्काररूपा
स्यदोषाधितयातदाहृतत्वेनातिप्रकाशकत्वाभावात्प्राज्ञत्वमस्येत्यर्थः॥यथा
जगत्कारणेश्वरोपाधेःकारणशरीरत्वंआनंदप्रचुरत्वेनचानंदमयत्वंकोशस्य

१३

एतेनचकोशत्वं॥तथाएतत्सर्वंनारतम्येनप्राज्ञचैतन्येप्यतिदिशति॥अहंकारा
दिति॥प्रलयकालेहिरण्यगर्भादिप्रपंचोत्पादकेश्वरमूलप्रकृतिवत्सुषुप्तिकाले
हंकारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापिकारणशरीर
त्वेइंद्रियतद्विषयाभावेव्यासंगाभावादानंदबाहुल्यादानंदमयत्वमात्माछादक
त्वाकोशत्वंचयुक्तमितिभावः॥ननुस्थूलसूक्ष्मशरीरलयस्थानस्यकथंसुषुप्ति
शब्दवाच्यत्वमित्याशंक्यपूर्ववत्संज्ञाभेदेनवस्तुभेदइतिवक्तुंतत्रयुक्तिमाह॥
॥ ॥सर्वोपरमत्वात्सुषुप्तिः॥स्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते॥ ॥पंचीकृ
तस्थूलशरीरस्यव्यावहारिकस्यापंचीकृतसूक्ष्मशरीरेप्रातिभासिकेस्वप्नावितत्वा
न्नस्याविप्रातिभासिकस्यसाक्षात्पंचस्यसकारणेज्ञानेलीनत्वात्सर्वोपरतिरित्य

वि

१३

र्थः॥तथाचोक्तं॥लयेफेनस्यतद्वर्मोद्वाद्यास्युस्तरंगके॥तस्यापिविलयेनीरंतिष्ठं
त्येतेयथापुरा॥१॥व्यावहारिकजीवस्यलयःस्यात्साक्षिभासिके॥तत्रयेसच्चिदा
नंदाःपर्यवस्यंतिसाक्षिणीति॥२॥ननुप्रलयकालेसुषुप्तिकालेचांतःकरणत
दृत्यभावेनआनंदग्राहकाभावादानंदप्राचुर्यसङ्गावेप्रमाणाभावमाशंक्यपरि
हरति॥॥तदानीमेतावीश्वरप्राज्ञौचैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभि
रानंदमनुभवतः॥॥यथास्वच्छत्वेनांतःकरणस्यवृत्तिरंगीक्रियते॥तथाचैतन्यदीप्ता
ज्ञानस्यापिसूक्ष्मावृतयःस्वीक्रियंते॥तथाचेश्वरप्राज्ञौस्वकीयाज्ञानवृत्तिभिःसात्मानं
दबाहुल्यतारतम्येनानंदमनुभवतइतिभावः॥अत्रैवोपष्टंभकत्वेनश्रुतिमव
तारयति॥॥आनंदभुक्चेतोमुखःप्राज्ञइत्यादिश्रुतेः॥॥उत्तरकालीनसुखपराम

र्शानुपपत्तिरपिपूर्वानुभूतसुखबाहुल्यानुभवसङ्गावेप्रमाणमित्याह॥॥सुख
महमस्वापंनकिंचिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्च॥॥सुखमहमस्वा
प्समित्यानंदपरामर्शः॥नकिंचिदवेदिषमितिअज्ञानमरामर्शः॥तथाच॥सुषुप्तिद
शायांप्रलयकालेचप्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवतएवेत्यर्थः॥इदानी
मीश्वरगतमूलाज्ञानस्यजीवगतसंस्कारमात्रावशिष्टाज्ञानस्यचसमष्टिव्यष्ट
भिप्रायेणभेदज्ञानेपिवस्तुभेदोनास्तीत्येतत्सदृष्टांतमाह॥॥अनयोःसमष्टिव्य
ष्ट्योर्घनवृक्षयोरिवजलाशयजलयोरिवचाब्रभेदः॥॥उक्तोपाधिद्वयद्वारेणईश्वर
प्राज्ञयोरप्यभेदंदृष्टांतमुखेनदर्शयति॥॥एतदुपहितयोईश्वरप्राज्ञयोरपिवनवृक्षा
वच्छिन्नाकाशयोरिवजलाशयजलगतप्रतिबिंबाकाशयोरिवाभेदः॥॥ईश्वरस्यव

नावच्छिन्नाकाशवत्॥प्राज्ञस्यदृक्षावच्छिन्नाकाशवच्च॥तथास्थूलजलाशयजलोपा
ध्यवच्छिन्नाकाशवत्प्रतिबिंबाकाशवच्चकारणोपाध्यवच्छिन्नेश्वरस्यकार्यो
पाध्यवच्छिन्नप्राज्ञस्यचवस्तुनोऽभेदएवेत्यर्थःतत्रप्रमाणमाह॥एषसर्वेश्वरइत्यादि
श्रुतेः॥॥तथाचोक्तमाचार्यैः॥कार्योपाधिरयंजीवःकारणोपाधिरीश्वरः॥कार्यकारणतां
हित्वापूर्णबोधोवशिष्यतइति॥उपाधिद्वयावच्छिन्नोप्राज्ञेश्वरौसत्रपंचंनिरूप्येदानीं
अनवच्छिन्नंतुर्यंचैतन्यंतल्लक्षयति॥॥वनदृक्षतदवच्छिन्नाकाशयोर्जलाशयज
लगतप्रतिबिंबाकाशयोर्वाआधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचै १५
तन्ययोराधारभूतंयदनुपहितंचैतन्यंतत्तुरीयमित्युच्यते॥॥यथास्थूलवनोपा
ध्यवच्छिन्नाकाशापेक्षया सूक्ष्मदृक्षोपाध्यवच्छिन्नाकाशापेक्षयाचमहाकाशस्यत

दुभयाधारतयाअनवच्छिन्नत्वाच्चमहाकाशत्वं॥तथाकार्यकारणोपाधितदवच्छिन्नचै
तन्यद्वयापेक्षयातदाधारभूतंयदनवच्छिन्नंसर्वव्यापिचैतन्यंविशुद्धंतुरीयमुच्यतइ
त्यर्थः॥अस्मिन्नर्थेश्रुतिंसंवादयति॥॥त्रिवर्णंतमद्वैतंचतुर्थमन्यंइतेत्यादिश्रुतेः
॥॥॥आदिपदात्त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्धेवत्॥तेभ्योविलक्षणःसाक्षी
चिन्मात्रोहंसदात्मेवइत्यादिश्रुत्यंतरग्रहः॥अध्यारोपणव्यासक्तचित्ततयाप्रकर
णार्थविस्मरणंमाभूदितिप्रसंगात्तन्माहेदमेवेति॥इदमेवविशुद्धंचैतन्यंसर्वोक्त
चैतन्यद्वयेनसहैकत्वविवक्षायांमहावाक्यस्यवाच्यत्वंलभते॥नेदंविवक्षायांचल
क्ष्यत्वंलभतइत्याह॥इदंतुरीयंशुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यांन
न्यायःपिंडवद्विविक्तंसन्महावाक्यस्यवाच्यंविविक्तंसल्लक्ष्यमितिचोच्यते॥॥तया

णांचैतन्यानांचैतन्यत्वेनरूपेणैकत्वेपिअवच्छिन्नत्वानवच्छिन्नत्वेनरूपेणवाचलस्यैवे
संभवतइतिभावः॥अथेदानींस्वप्रकाशचिद्रूपस्यात्मनःकथंकुत्रितप्रकाशत्वंक
थंवाऽसंगोदासीनस्यात्मनःआकाशादिप्रपंचजनकत्वमित्येतन्मूढाविरोधपरि
हारायाज्ञानस्यशक्तिद्वयंनिरूप्यते॥॥अस्याज्ञानस्यचावरणविक्षेपेनामकम
स्तिशक्तिद्वयं॥तेएवनामतोनिर्दिशति॥आवरणशक्तिस्तावत्सच्चिदानंद
स्वरूपमाहणोतीत्यावरणशक्तिः॥ब्रह्मादिस्थावरांतंजगज्जलबुद्बुदवन्ना
मरूपात्मकंविक्षिपतिसृजतीतिविक्षेपशक्तिरितिशक्तिद्वयमज्ञानस्येत्य १६
र्थः॥ननुपरिछिन्नस्यस्वप्रकाशचिद्रूपोखंडपरिपूर्णस्वरूपस्यात्मनःपरिछि
न्नेनानित्येनजडतमोरूपेणाव्यापकेनाज्ञानशक्तिविशेषेणकथमावरणमि

त्याशंक्यवस्तुतोऽज्ञानस्यात्माच्छादकत्वाभावेपिस्वमात्रबुद्धिमात्राच्छादक
त्वेनअज्ञानस्यआत्माच्छादकत्वमुपचारादुच्यतइत्याह॥आवरणशक्ति[redacted]स्ता
वद्रव्योपिमेघोऽनेकयोजनायतमादित्यमंडलमवलोकयित्वनयनपिधाय
कतयायथाच्छादयतीव॥तथाऽज्ञानंपरिछिन्नमपि[redacted]
[redacted]आत्मानमपरिछिन्नमसंसारिणमवलोकयित्वबुद्धिपिधायकतयाच्छा
दयतीति॥तादृशंसामर्थ्यं॥यथाअत्यल्पोपिमेघोऽनेकयोजनविस्तीर्णमा
दित्यमंडलमवलोकयित्वपुरुषदृष्टिमात्राच्छादकत्वेनादित्यमाच्छादयतीत्यु
पचर्यते॥तथातुछंपरिछिन्नमज्ञानंस्वमात्रबुद्धिमात्राच्छादकत्वेनात्मानमा
च्छादयतीत्युपचारादुच्यतेइत्यर्थः॥अस्मिन्नर्थेहसंमतिमाह॥॥तदुक्तं॥घन

छन्नदृष्टिर्घनच्छन्नमर्कंयथामन्यतेनिःप्रभंचातिमूढः॥तथाबहुवङ्गाति योमूढद
ष्टेःसनित्योपलब्धिस्वरूपोहमात्मेति॥१॥अनयैवावरणशक्त्याऽवच्छिन्नस्यात्मनः
कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारसंभावनापिसंभवति॥इयमे
वावरणशक्तिरात्मनोभेदबुद्धिजनकत्वेनसंसारहेतुरितिभावः॥अत्रानुरू
पंदृष्टांतमाह॥यथास्वाज्ञानेनाहतायांरज्वांसर्पत्वसंभावना॥यदुक्तमसंगोदा
सीनस्यात्मनःकथंजगत्कारणत्वमितितन्निराकर्तुंविक्षेपशक्तिस्वरूपमाह॥ १७
॥विक्षेपशक्तिस्तुयथारज्वज्ञानंस्वाहृतरज्वांस्वशक्त्यासर्पादिकंसमुद्भावय
ति॥एवमज्ञानमपिस्वाहृतात्मनिविक्षेपशक्त्याआकाशादिकंसपंचमुद्भा
वयतितादृशंसामर्थ्यं॥यथारज्जुविषयकमज्ञानंसर्पमुद्भावयति॥

विषयकमज्ञानमपिस्वावच्छिन्नेआत्मनिविक्षेपशक्तिप्रभावेनाकाशादिकं
सपंचमुद्भावयतीत्यर्थः॥अस्मिन्नर्थेयंथांतरसंमतिंदर्शयति॥तदुक्तं॥
विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेदिति॥ननुकिमात्माचराचरात्म
कप्रपंचस्यनिमित्तकारणंउपादानकारणंवा॥नाद्यः॥दंडादिवत्स्वकार्यव्या
पित्वेनस्यात्आत्मनःतत्सृष्टानदेवानुप्रविशादितिश्रुत्यास्वकार्यव्यापि
त्वश्रवणात्॥नद्वितीयः॥अचेतनस्यजडस्यप्रपंचस्यचैतन्योपादानकत्वा
संभवात्॥उपादानत्वेनचकार्यकारणयोरभेदेनप्रपंचस्यापिचैतन्यरूपत्व
प्रसंगादनित्यत्वेनस्यादित्यान्नोक्तयजडप्रपंचस्यात्मनःचैतन्यप्राधान्येननि
मित्तत्वं॥स्वाज्ञानप्राधान्येनोपादानत्वंचसंभवतीत्याह॥॥शक्तिद्वयवदज्ञानोप-

हितंचैतन्यंस्वप्रधानतयानिमित्तंस्वोपाधिप्राधान्यतयोपादानंचभवति॥॥यथा
अयस्कांतसन्निधानेजडमयश्चेष्टते॥तथाचैतन्यसन्निधानेजडमयमज्ञानंचे
ष्टते॥इत्यज्ञानविकारंप्रतिचैतन्यस्यनिमित्तत्वंजडाकाशादिकार्यंप्रतिमाया
याःसाक्षादुपादानत्वेनमायाविनेश्वरस्यापिपरंपरयोपचारादुपादानत्वं
नविरुद्धमतइत्यर्थः॥यदुक्तं॥चैतन्यस्यनिमित्तकारणत्वेकार्यानुप्रवेशान
स्यादिति॥तन्नकारणस्यकार्यानुप्रवेशनियमस्योपादानकारणत्वविषयत्वेन
निमित्तकारणविषयत्वाभावात्॥तत्सृष्ट्वेत्यादिश्रुतेरप्युपादानकारणपरत्वात्
॥यदप्युक्तंआत्मनउपादानकारणत्वेनप्रपंचस्यानित्यत्वंनस्यादितितदपिन॥
तस्यपरिणामविषयत्वेनविवर्तविषयत्वाभावात्॥प्रपंचस्यब्रह्मविवर्तत्वात्॥

विवर्तत्वंचस्वस्वरूपापरित्यागेनस्वरूपांतरप्रदर्शकत्वं॥यथारज्ज्वधिष्ठानचैत
न्यनिष्ठाज्ञानस्यरज्जुस्वरूपापरित्यागेनस्वरूपांतराकारेणप्रदर्शकत्वं॥तथाई
श्वरचैतन्यनिष्ठाज्ञानस्यापिचैतन्यस्वरूपापरित्यागेनआकाशादिस्वरूपांत
राकारेणप्रदर्शकत्वं॥एतावताआकाशादिप्रपंचस्यनित्यत्वंनसंभवति॥अज्ञा
नस्यमिथ्यास्वरूपत्वेतज्जन्याकाशादिप्रपंचस्यापिमिथ्यात्वात्॥नचैवमज्ञानस्यमि
थ्यात्वेतत्प्रयुक्तबंधमोक्षयोरपिमिथ्यात्वप्रसंगइतिवाच्यं॥इष्टापत्तेः॥तदुक्तंभा
गवते॥बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः॥गुणस्यमायामूलत्वान्नमेमोक्षोन
बंधनमित्यलमतिविस्तरेण॥एकस्यैवात्मनोनिमित्तोपादानकारणत्वेदृष्टांतमाह॥
॥॥यथोर्णनाभितंतुंस्वकार्यंप्रतिस्वप्रधानतयानिमित्तंस्वशरीरप्रधानतयोपादा

नंचभवति॥यथास्तूतांतंतुस्चोत्पाद्यमानलक्षणंकार्यप्रतिस्वचैतन्यप्रधानतयानिमि
त्तं॥चैतन्यसन्निधानव्यतिरेकेणजडस्यदेहस्यप्रतशरीरवत्तंतुजनकत्वासंभवात्स्व
शरीरप्राधान्येनउपादानंचभवति॥शरीरस्यसाक्षात्तंतुतउपादानत्वेननदवछिन्न
त्वेपुपादानत्वेनोपचारात्॥एवमीश्वरस्यापिस्वचैतन्यप्रधानतयानिमित्तत्वंस्वो
पाधिप्रधानतयोपादानत्वंचभवतीत्यर्थः॥इदानींविक्षेपन्याक्किकृत्यमाह॥ ॥तमः
प्रधानविक्षेपन्याक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुर्वायोरग्नि
रग्नेरापःअद्भ्यःपृथिवीचोत्पद्यते॥आकाशादेर्जडत्वात्समोगुणप्रधानविक्षेपन्याक्ति
काज्ञानावछिन्नचैतन्यस्यैवआकाशादिप्रपंचजनकत्वमितिभावः॥अस्मिन्नर्थे
श्रुतिंप्रमाणयति॥तस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिश्रुतेः॥एतेनार्थो

सांख्यनैयायकपक्षोनिरस्तो॥शक्तेरज्ञानस्यशक्तिमत्परतंत्रत्वात्॥स्वतंत्रस्यतस्यैकेव
लस्यजडस्याज्ञानस्यजगत्कारणत्वानुपपत्तेः॥ईक्षतेर्नाशब्दंरचनानुपपत्तेश्चनानु
मानमित्यादिन्यायश्चिरस्तत्वाच्च॥परमाणोरणुत्वदोषप्रसक्त्यासत्कार्यानापायात्सभिन्न
निमित्तोपादानत्वंचतिपादकश्रुतिस्मृतिन्यायविरोधाच्च॥स्मृतेर्वाइमानिभूतानि
जायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंति॥सदेवसोम्येदमग्रआसीत्॥
एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच॥अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते॥
बीजंमांसर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वरस्यैवजगत्कारणत्वंचतिपाद
नात्॥नन्वाकाशादिप्रपंचोत्पादकचैतन्यावछेदकाज्ञानेकुतस्तमःप्राधान्यमित्या
शंक्याह॥ ॥तेषुजाड्याधिक्यदर्शनात्तमःप्राधान्येतत्कारणस्य॥कारणगुणाहिका

र्यगुणानारभंतइतिन्यायादितिभावः॥ननुत्रिगुणात्मकत्वादज्ञानस्यकथंतन्मो गु
णमात्रप्राधान्येनआकाशादिजनकत्वमित्याशंक्याह॥तदानींसत्वरजस्तमोसृका
रणगुणक्रमेणतेषाकाशादिष्वत्पद्यते॥तदानीमुत्पत्तिवेलायांसत्वादयस्त्रयोपि
गुणास्तारतम्येनकारणक्रमन्यायेनतेषाकाशादिषुपंचभूतेष्वतरोत्तराधिक्येन
जायंतइत्यर्थः॥ ॥एतान्येवसूक्ष्मभूतानितन्मात्राण्यपंचीकृतानिचोच्यंते॥इमा
न्येवसूक्ष्मशरीरादिकारणभूतान्यपंचीकृतानिसूक्ष्मरूपपंचभूततन्मात्राणी
त्युच्यंतइत्याह॥तद्भेदः॥पंचप्राणमनोबुद्धिर्दशेंद्रियसमन्वितं॥अपंचीकृत
भूतोत्थंसूक्ष्मांगंभोगसाधनंइतिवचनादपिअपंचीकृतभूतेभ्योऽपंचीकृतसू
क्ष्मशरीराणिपंचीकृतस्थूलभूतेभ्यश्च स्थूलशरीराणिचोत्पद्यंतेइत्याह॥ ॥एतेभ्यः

२०

सूक्ष्मशरीराणिस्थूलभूतानिचोत्पद्यंतेसूक्ष्मशरीराणिसप्तदशावयवानिलिंगश
रीराणि॥सूक्ष्मशरीरस्वरूपभूतानवयवान्नाह॥अवयवास्तुज्ञानेंद्रियपंचकंबुद्धिम
नसीकर्मेंद्रियपंचकंवायुपंचकंचेति॥ ॥तत्रज्ञानेंद्रियाण्युपदिशति॥ज्ञानेंद्रिया
णिश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि॥सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यतेसात्वि
कांशाद्वायोस्त्वगिंद्रियं॥स्तात्विकांशात्तेजसश्चक्षुः॥सात्विकांशाज्जलाज्जिह्वा॥सा
त्विकांशायाःपृथिव्याःसकाशात्घ्राणेंद्रियंचेतिक्रमेणोत्पद्यंतइत्याह॥एतान्याका
शादीनांसात्विकांशेभ्योव्यस्तेभ्यःपृथक्पृथक्क्रमेणोत्पद्यंते॥बुद्धेर्लक्षणमाह॥
बुद्धिर्नोमनिश्चयात्मिकांतःकरणवृत्तिः॥ब्रह्मेवादमितिनिश्चयात्मिकैवांतःकर
णवृत्तिरेवबुद्धिरित्यर्थः॥ मनसोलक्षणमाह॥मनोनामसंकल्पविकल्पात्मिकांतः

करणवृत्तिः॥ ॥अहंचिद्रूपोदेहोवेतिसंशयात्मिकांतःकरणवृत्तिरेवमनइत्यर्थः॥ स्मरणात्मकचित्तस्यगर्वात्मकाहंकारस्यचबुद्धिमनसोरंतर्भावइत्याह॥ ॥अनयोरेवचित्ताहंकारयोरंतर्भावः॥ ॥यद्यप्यंतःकरणत्वेनचतुर्णामेकत्वंतथाप्येकस्यैवपुरुषस्यपाचकःपावकइत्यादिवृत्तिभेदाद्भेदवदेकस्याप्यंतःकरणस्यनिश्चयसंशयस्मरणाहंकारविषयभेदैर्बुध्यादिभेदइत्यर्थः॥बुध्यादीनामुत्पत्तिप्रकारंदर्शयति॥ ॥एतेपुनराकाशादिगतसात्विकांशेभ्योमिलितेभ्यउत्पद्यंते॥ ॥एतेषांचतुर्णांसात्विकांशाभूतेभ्यःउत्पत्तौनिमित्तमाह॥ ॥एतेषांचकाशात्मकत्वात्सात्विकांशाकार्यत्वं॥बुद्ध्यादीनांचकाशात्मकत्वात्सात्विकांशाभूतकार्यत्वमित्यर्थः॥बुद्धिर्विज्ञानमयकोशंदर्शयति॥ ॥इयंबुद्धिर्ज्ञानेंद्रियैःसहितासतीविज्ञानमयकोशोभवति ॥ ॥बुद्धेःसत्वकार्यत्वात्ज्ञानेंद्रियसाहित्येनप्रकाशाधिक्याद्विज्ञानमयत्वं॥आत्माछादकत्वाच्चकोशत्वमित्यर्थः॥विशुद्धबुद्धिप्रतिबिंबितचिदात्मनोजीवत्वंदर्शयति॥ ॥अयंकर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनइहलोकपरलोकगामीव्यवहारीकजीवइत्युच्यते॥ ॥तस्मायःपिंडवद्बुध्यारोपितंचैतन्यंवस्तुतोऽकर्तृत्वभोक्तृनित्यानंदापरिछिन्नमविक्रियमपिभोक्तृत्वकर्तृत्वसुखित्वदुःखित्वपरिछिन्नत्वक्रियात्वाद्यभिमानेनस्वर्गादिलोकांतरगामित्वंव्यावहारीकजीवत्वंचलभतइत्यर्थः॥मनोमयकोशंनिरूपयति॥मनसाज्ञानेंद्रियैःसहितंसन्मनोमयकोशोभवति॥ ॥सत्वगुणप्रधानंमनःसत्वगुणांशेभ्योजातैःश्रोत्रादिज्ञानेंद्रियैरेवसहितंसन्मनोमयकोशइत्यर्थः॥ अत्रतुमनसःसत्वोपहितरजोविकारेच्छारूपत्वात्संकल्पविकल्पात्मकत्वेनबुद्धेरप्ययाजा

वेदा-दी- २२

ज्ञाधिक्यान्मनोमयत्वं॥आत्माच्छादकत्वात्कोशत्वमितिभावः॥कर्मेंद्रियाण्युपदिशति॥कर्मेंद्रियाणिवाक्पाणिपादपायूपस्तेषामुत्पत्तौसाधनापेक्षायामाह॥एतानिपुनराकाशादीनांरजोंशेभ्योव्यस्तेभ्यःपृथक्पृथक्क्रमेणोत्पद्यंते॥भूतानांत्रिगुणत्वेपिरजोगुणबाहुल्येभ्योभूतेभ्योवागादीनिपृथक्पृथक्क्रमेणजायंते॥रजोगुणप्रधानादाकाशाद्वागुत्पद्यते॥रजोगुणप्रधानाद्वायोःपाणींद्रियं॥रजोगुणप्रधानादग्नेःपादेंद्रियं॥रजोगुणप्रधानाज्जलात्पायुंद्रियं॥रजोगुणप्रधानायाःपृथिव्याःगुह्येंद्रियमुत्पद्यतइत्यर्थः॥वायूनुपदिशति॥वायवःप्राणापानव्यानोदानसमानाः॥यथोद्देशंघ्राणस्यलक्षणमाह॥प्राणोनामप्रागमनवान्हृदयादिनासाग्रस्थानवर्त्ती॥ऊर्द्धगमनशीलोहृदयादिनासाग्रस्थायीवायुःप्राणइत्यर्थः॥अपानस्यलक्षणमाह॥अपानोनामअ

२२

वागमनवान्पाय्वादिस्थानवर्त्ती॥अधोगमनशीलःपाय्वादिस्थायीवायुरपानइत्यर्थः॥व्यानस्यलक्षणमाह॥॥व्यानोनामविधमनवानखिलशरीरवर्त्ती॥सर्वनाडीगमनशीलोऽखिलशरीरस्थायीवायुर्व्यानइत्यर्थः॥उदानस्यलक्षणमाह॥उदानोनामकंठस्थानीयऊर्द्धगमनवानुत्क्रमणवायुः॥ऊर्द्धमुत्क्रमशीलःकंठस्थायीवायुरुदानइत्यर्थः॥समानस्यलक्षणमाह॥समानोनामशरीरमध्यगतअशितपीतान्नादिसमीकरणकरः॥शरीरमध्यगतांनरसादिनेतावायुःसमानइत्यर्थः।प्राणादीनांवायुत्वेनरूपेणैकत्वेपिक्रियाभेदेनभेदइत्यर्थः॥कापिलमतानुसारिणःक्रियाभेदेनान्येपिपंचवायवःसंतीतिवदंतीत्याह॥केचित्तु॥नागकूर्मकृकलदेवदत्तधनंजयाख्याःपंचान्येवायवःसंतीतिवदंति॥तान्येवनामानिनिर्दिशति॥नागोद्गादिना॥नागउद्गीरणकरः॥कू

र्मउन्मीलनकरः॥ कूकलःस्तुक्करः॥ देवदत्तोविजृंभणकरः धनंजयःपोषणकरः॥ त
थाचोक्तं॥ उद्गारेनागआख्यातःकूर्मउन्मीलनेस्मृतः॥ कृकलस्तुस्तुतिज्ञेयोदेवदत्तो
विजृंभणे॥ नजहातिमृतंचापिसर्वव्यापीधनंजयइति॥ वेदांतिनस्तुनागादीनांप्राण
दिष्वंतर्भावंवदंतिइत्याह॥ एतेषांप्राणादिषंतर्भावात्प्राणदयःपंचैवेतिकेचित्॥
प्राणादिवायूनामुत्पत्तौकारणापेक्षायामाह॥ ॥एतत्प्राणादिपंचकमाकाशादिरजो
ऽशेभ्योमिलितेभ्यउत्पद्यते॥ अपंचीकृतपंचमहाभूतेभ्योरजःप्रधानेभ्यःप्राणाद यो
जायंतेइत्यर्थः॥ एतेषांप्राणादीनांप्राणप्रचुरत्वात्प्राणमयत्वंआत्मा छादकत्वात्को
शत्वंचभवतीत्याह॥ इदंप्राणादिपंचकंकर्मेंद्रियैःसहितंसत्प्राणमयकोशोभवति॥
प्राणादीनांरजःप्रधानभूतकार्यत्वेनिमित्तमाह॥ अस्यक्रियात्मकत्वेनरजोंशकार्यत्वं॥ प्रा

णादीनांक्रियात्मकत्वात्रजःकार्यत्वमित्यर्थः॥ एतेषुपंचसुकोशेषुमध्येविज्ञानमयमनो
मयप्राणमयकोशानांक्रमेणज्ञानेच्छाक्रियाशक्तिभेदेनकर्तृकरणक्रियारूपत्वंदर्शय
ति॥ ॥एतेषुकोशेषुमध्येविज्ञानमयोज्ञानशक्तिमान्कर्तृरूपः॥ मनोमयइच्छाशक्तिमा
न्करणरूपः॥ प्राणमयःक्रियाशक्तिमान्कार्यरूपः॥ ॥तत्रहेतुमाह॥ योऽपत्वादेवमेते
षांविभागइतिवर्णयंति॥ इदमेवकोशत्रयंसूक्ष्मशरीरमितिव्यवह्रियतइत्याह॥ ॥ए
तत्कोशत्रयंमिलितंसत्सूक्ष्मशरीरमित्युच्यते॥ ॥अस्यसमष्टित्वेहेतुमाह॥ ॥अ
त्रापिलिंगसूक्ष्मशरीरमेकबुद्धिविषयतापन्नवनवज्जलाशयवद्धासमष्टिः॥ ॥एकबुद्धी
नांचराचरप्राणिमात्रस्यावंत्यनंतानिसूक्ष्मशरीराणितेषांसर्वेषांसूक्ष्मशरीराणांसू
त्रात्माहिरण्यगर्भत्वेनस्वीयैकबुद्धाविषयीकृतत्वात्समष्टित्वंइत्यर्थः॥ तत्रदृष्टांतमा

ह॥वनवदित्यादिना॥अस्यैवसूक्ष्मशरीरस्यव्यष्टित्वंदर्शयति॥अनेकबुद्धिविषयतयाव्य
ष्टिरूपिभवति॥अनेकेषांजीवानांप्रत्येकंस्वस्वलिंगशरीरस्यस्वस्वबु
द्धिविषयत्वेनानेकबुद्धिविषयतयाव्यष्टित्वमित्यर्थः॥तत्रदृष्टांतमाह॥वृक्षवदित्या
दि॥उक्तसमष्ट्युपहितचैतन्यस्यसूत्रात्मत्वादिसंज्ञांदर्शयति॥एतत्समष्ट्युपहि
तंचैतन्यंसूत्रात्माहिरण्यगर्भःप्राणश्चेत्युच्यते॥तत्रहेतुमाह॥सर्वत्रानुस्यूतत्वात्
ज्ञानक्रियाशक्तिमदुपहितत्वाच्च॥सर्वप्राणिलिंगशरीरेषुअनुस्यूतत्वाद्दियमानत्वादि
त्यर्थः॥विज्ञानमयादिकोशत्रयस्यसूक्ष्मशरीरतांदर्शयति॥॥अस्यैषासमष्टिःस्थूलप २४
पंचापेक्षयासूक्ष्मत्वात्सूक्ष्मशरीरंविज्ञानमयादिकोशत्रयं॥॥अस्यसूत्रात्माहिरण्य
गर्भस्यविज्ञानमयादिकोशत्रयंसूक्ष्मशरीरं॥अस्यस्थूलपंचापेक्षयासूक्ष्मत्वादि

त्यर्थः॥अस्यैवविज्ञानमयादिकोशत्रयस्यस्वप्नत्वेयुक्तिमाह॥जाग्रद्वासनामयत्वात्स्वप्नः
विराट्स्वरूपेणानुभूतस्थूलप्रपंचविषयकवासनामयत्वात्स्वप्नत्वमस्यित्यर्थः॥अतए
वस्थूलप्रपंचलयस्थानमितिचोच्यते॥यतःस्वप्नंसूक्ष्मंच॥अतएवस्थूलप्रपंचल
यस्थानमित्युच्यतइत्यर्थः॥विज्ञानमयादिसमष्ट्युपाधवच्छिन्नचैतन्यस्यहिरण्यगर्भत्वं
प्रतिपाद्येदानींतद्व्युपलक्षितचैतन्यस्यतैजसत्वंनिरूपयति॥एतद्व्युपहितंचै
तन्यंतैजसोभवति॥तत्रहेतुमाह॥तेजोमयांतःकरणोपहितत्वादस्यापीपंच्य
ष्टिःस्थूलशरीरापेक्षयासूक्ष्मत्वाद्धितिहेतोश्चसूक्ष्मशरीरंविज्ञानमयादिकोशत्र
यं॥व्यष्टिरूपंविज्ञानमयादिकोशत्रयंतैजसस्यापिसूक्ष्मशरीरमितिदर्शयतिअ
स्यापीति॥सूक्ष्मशरीरत्वेहेतुमाह॥स्थूलेति॥अस्यापिस्वप्नत्वेहेतुमाह॥जाग्रद्वासनाम

यत्वात्स्वप्नः॥विश्वचैतन्येनानुभूतस्थूलशरीरविषयकवासनामयत्वात्स्वप्नत्व
मित्यर्थः॥अस्यैवसूक्ष्मशरीरस्यस्थूलशरीरलयस्थानत्वेयुक्तिमाह॥जाग्रद्वासना
मयत्वात्स्वप्नःस्थूलशरीरलयस्थानमितिवक्ष्यते॥यथापूर्वंप्राज्ञेश्वरावस्थानद्व
न्तिभिःसुषुप्तावस्थोयामानंदमनुभवतः।तथाहिरण्यगर्भतैजसावपिस्वप्नावस्था
यांमनोवृत्तिभिःसूक्ष्मवासनामयान्बाह्यादिविषयाननुभवतःइतिवक्ष्यति।ए
तौसूत्रात्मतैजसौतदानींमनोवृत्तिभिःसूक्ष्मविषयाननुभवतः॥अस्मिन्नर्थेश्रुतिमुदा
हरति॥प्रविविक्तभुक्तैजसइत्यादिश्रुतेः॥प्रविविक्तंभुंक्तेइतिप्रविविक्तभुक्॥इहा
पिविज्ञानमयादिकोशत्रयस्यसमष्टिरूपस्यतदवच्छिन्नसूत्रात्मनश्चव्यष्टिरूपं
विज्ञानमयादिकोशत्रयस्यतदवच्छिन्नतैजसचैतन्यस्यचवनेवृक्षादितदवच्छिन्ना

काशादिदृष्टांतमुखेनाभेदंदर्शयति॥अत्रापिसमष्टिव्यष्टीसंडुपहितसूत्रात्मतैज
सयोर्वनवृक्षवन्नदवच्छिन्नाकाशवज्जलाशयजलवत्तज्जलगतप्रतिबिंबाकाशवच्चा
भेदः॥समष्टिव्यष्टुपाध्योर्वनवृक्षवज्जलाशयजलवच्चाभेदः॥उपाधिद्वयावच्छिन्नचै
तन्ययोःसूत्रात्मतैजसयोरपिवनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबा
काशवच्चाभेदःइत्यर्थः॥सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति॥एवंसूक्ष्मशरीरोत्प
त्तिः॥अथेदानींस्थूलशरीरोत्पत्तिंनिरूपयितुमुपक्रमते॥स्थूलभूतानितुपंचीकृता
नि॥तुशब्दःपूर्वस्माद्वैषम्यंद्योतयति॥पंचीकृतानीति॥पंचीकृतसूक्ष्मभूतापेक्षया
स्थूलभूतानिपंचीकृतानीत्यर्थः॥पंचीकरणमेवप्रतिपादयितुंप्रतिजानीते॥पंचीकर
णंतुपंचीकरणप्रकारमेवाह॥आकाशादिपंचसुएकैकंद्विधासमंविभज्यतेषुदशसुभागे

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

प्रथमिकान्पंचभागान्प्रत्येकंचतुर्द्धासमंविभज्यतेषांचतुर्णांभागानांस्वस्वद्वितीया
र्द्धभागपरित्यागेनभागांतरेषुयोजनं॥अयमर्थः॥सृष्टिकालेसकलप्राण्यदृष्टवशादी
श्वरप्रेरणयाआकाशवायुतेजोबन्ह्यन्यविद्यासहायभूतात्परमात्मनःसकाशादनु
क्रमजातानितान्यपंचीकृतानिसूक्ष्माणिव्यवहारासमर्थानीतिकृत्वातदीयस्थोल्या
पेक्षयाव्यवहर्तृप्राणिजातधर्माधर्मापेक्षयैवतान्येवभूतानिपंचीकृतानिभवंति
॥तानिचप्रत्येकंद्वैविध्यमापद्यंते॥तेष्वाकाशादिषुदशसुभागेषुप्रथमिकान्यं
चभागान्प्रत्येकंचतुर्द्धासमंविभज्यस्वार्द्धपरित्यागेनचतुर्णांप्रत्येकंभागांतरेषुस
न्निवेशेनपंचीकृतानिस्थूलानिभवंतीति॥अस्मिन्नर्थेवृद्धसंमतिमाह॥तदुक्तं॥द्विधा
विधायचैकैकंचतुर्द्धाप्रथमंपुनः॥स्वस्वेतरद्वितीयांशैर्योजनंपंचपंचचेति॥पंचीकर २६

णस्यविवक्षाकरणप्रतिपादकश्रुत्यंतरविरोधमाशंक्यपरिहरति॥अस्याप्रामाण्यंनाशंक
नीयं॥विवक्षत्करणमितिश्रुतेः॥पंचीकरणस्यासुपलक्षणत्वात्॥यत्तत्रयसृष्टिश्रुतौस्
२ ष्टिपरिपूर्णार्थंअन्यत्रश्रुतमपिभूतद्वयमाश्रित्यभूतपंचकाभिप्रायेणभूतत्रयसृष्टि
प्रतिपादनाद्विरोधइत्यर्थः॥आकाशादिपंचभूतेषुचतुर्द्धाविभक्तानामन्येषां
पंचभूतानांप्रत्येकानुप्रवेशेनपंचीकृतानामाकाशादीनांपंचात्मकत्वाविशेषा
दाकाशादिव्यपदेशेनस्यादितिआशंक्यपरिहरति॥पंचानांपंचात्मकत्वेसमाने
पितेषुवैशेष्यान्नह्यदस्तूलादहूतिन्यायेनआकाशादिव्यपदेशःसंभवति॥आका
शादीनांपंचानांपंचात्मकत्वेसमानेपितेषुपंचभूतेषुतत्तत्प्रविशेषानुप्रवेशात्तत्र
तन्नामभिर्व्यवहारःसंभवतीत्यर्थः॥तदानीमाकाशोल्काह्नोभिव्यज्यते॥यदापंचीकृता

न्याकान्यादीनितदानीस्वलत्वेनस्वकार्योत्पादनसमर्थनादाकारेणव्यक्तरूपेणस्थितः
ग्राह्येभिव्यक्तेव्यक्तोभवतीत्यर्थः॥वायोर्ग्राह्यस्यस्पर्शोअग्नेर्ग्राह्यस्यरूपाणि॥अप्सु ग्रा
ह्यस्यरसःपृथिव्यांग्राह्यस्यरूपरसगंधाश्च॥उक्तेभ्योभूतेभ्यश्चतुर्द्दशभुवनो
त्पत्तिप्रकारंदर्शयति॥एतेभ्यःपंचीकृतेभ्योभूतेभ्योभूर्भुवःस्वर्महर्जनस्तपःसत्यमि
तेसप्तव्याहृतीनामुपर्युपरिद्यमानानामतलपातालवितलसुतलरसातलतलातल
महातलानामनेकानामधोधोविद्यमानानांलोकानांब्रह्मांडस्थानुचेर्विधस्थूलशरीरा
णांतदुचितानामन्नपानादीनांचोत्पत्तिर्भवति॥एतेभ्योभूतेभ्यःसमुत्पन्नानांभुवनानां
ब्रह्मांडस्यचतुर्विधस्थूलशरीराणांचतद्योग्यान्नपानादीनांचोत्पत्तिर्भवतीत्यर्थः॥च
तुर्विधशरीराण्युद्भिजातिं॥चतुर्विधशरीराणितुजरायुजांडजोद्भिज्जानि॥ता

निचयथोद्देशंविहरणेति॥जरायुजानि॥जरायुभ्योजातानिमनुष्यपश्वादीनि॥अंडजा
निअंडेभ्योजातानिपक्षिसर्पगादीनि॥उद्भिज्जानिभूमिमुद्भिद्यजातानिकक्षवृक्षादीनि
॥स्वेदजानिस्वेदेभ्योजातानियूकामशकादीनि॥पूर्ववदन्नापिसमष्टिव्यष्टिभेददर्शयति
॥अत्रापिचतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतयावनवज्जलान्नायवह्नास
मष्टिःवृक्षवज्जलवह्नाव्यष्टिरपिभवति॥चतुर्विधशरीरजातमपिशरीरमित्येकबुद्धिविष
यतयावनवत्समष्टित्वं॥प्रत्येकंतच्छरीरविषयतयानेकबुद्धिविषयत्वाद्वृक्षवद्व्यष्टित्वं
चलभतेइत्यर्थः॥अधुनाभूरादिचतुर्द्दशभुवनांतर्गतचतुर्विधस्थूलशरीरसमष्टु
पहितचैतन्यस्यवैश्वानरत्वापरपर्यायंवैराजत्वंदर्शयति॥एतत्समष्टुपहितचैतन्यं
वैश्वानरोविराडित्युच्यते॥तत्रयुक्तिमाह॥सर्वनराभिमानित्वाद्विविधराजमानत्वाच्च॥

॥सर्वप्राणिनिकाये ष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं॥विविधंनानाप्रकारेणप्रकाशमा
नत्वाच्च वैराजत्वंलभतइत्यर्थः॥अस्येषासमष्टिःस्थूलशरीरं॥अस्यविराट्चैतन्यस्य
एषाएवोक्तायाब्रह्मांडांतर्गतचतुर्विधस्थूलशरीरसमष्टिरेवस्थूलशरीरमित्यर्थः
॥अन्नविकारत्वादन्नमयकोशः॥स्थूलभोगायतनत्वाच्चस्थूलशरीरं॥जाग्रत्वे
तिव्यपदिश्यते॥अन्नविकारबाहुल्यादन्नमयत्वं॥आत्माच्छादकत्वात्कोशत्वं॥
स्थूलशरीरादिविषयपयुक्तसुखदुःखभोगायतनत्वाच्चस्थूलशरीरत्वं॥इंद्रिये २८
रर्थोपलब्धृजाग्रदवस्थाचघटतइत्यर्थः॥चतुर्विधस्थूलशरीरंसमष्ट्युपहि
तचैतन्यंविश्वइत्युच्यते॥एतेषांचतुर्विधशरीराणांयाव्यष्टिस्तत्तच्छरीरव्यक्तिरूपउ
पहितंचैतन्यंविश्वइत्युच्यतेइत्यर्थः॥तत्रहेतुमाह॥सूक्ष्मशरीराभिमानंपरित्यज्य

२सप्रपंचमभिधायइदानीतद्व्यष्ट्युपहितचैतन्यमभिधत्ते॥एतद्व्यष्ट्युपहितचैतन्यं२

स्थूलशरीरादिप्रविष्टत्वात्॥सूक्ष्मलिंगशरीराभिमानंपरित्यज्यस्थूलशरीरेषुप्रविश्य
तत्तत्स्थूलशरीरेषुसर्वेषुचत्वेकमहमित्यभिमानवत्त्वाद्विश्वत्वमित्यर्थः॥अ
स्यापेषाव्यष्टिःस्थूलशरीरं॥अस्यचैतन्यस्यापेषातत्तच्छरीरव्यक्तिविशेषलक्षणाव्य
ष्टिःसैवस्थूलशरीरमित्यर्थः॥अत्रापन्नविकारबाहुल्यादन्नमयत्वं॥चैतन्याछाद
कत्वात्कोशत्वंइंद्रियैरर्थोपलंभाज्जाग्रत्वंचक्रमेणदर्शयति॥अन्नविकारत्वा
देवहेतोरन्नमयकोशःजाग्रदितिचोच्यते॥अधुनाजाग्रदवस्थायांविश्ववैश्वानर
योस्तत्तद्देवताऽधिष्ठितश्रोत्रादिभिश्चतुर्दशाभिःकरणैःशब्दादिविषयग्रहण
प्रकारंदर्शयति॥तदानीमेतोविश्ववैश्वानरौदिग्वातार्कवरुणाश्विभिःक्रमा
न्नियंत्रितैनश्रोत्रादींद्रियपंचकेनक्रमाच्छब्दस्पर्शरूपरसगंधान्॥अग्नीद्रोपेंद्र

यमप्रजापतिभिः क्रमान्नियंत्रितेनवागादींद्रियपंचकेनक्रमाद्गृह्णादानगमन
विसर्गानंदान्गृह्णंश्चक्षुर्मुखरंकराद्युतेः क्रमान्नियंत्रितेनमनोबुद्ध्यहंकार
चित्राख्येनांतरिंद्रियचतुष्केणक्रमात्संकल्पनिश्चयाहंकृतिचेत्यांश्चसर्वान्ए
तान्स्थूलविषयानेवास्मिन्नर्थेश्रुतिंसंवादयति॥जागरितस्थानोबहिःप्राज्ञस्त्या
दित्यतेश्चसमष्ट्यष्टोः अनयोर्विश्वैश्वानरयोर्वनहस्यावच्छिन्नाकाशदृष्टंते
नजलाशयजलवत्तत्गतप्रतिबिंबाकाशदृष्टंतेनचपूर्ववदनेदंसाधयति॥
॥अत्रापनयोःस्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्वैश्वानरयोश्चवनहस्यवत्त २९
दवच्छिन्नाकाशवच्चजलाशयजलवत्तज्जतप्रतिबिंबाकाशवच्चपूर्ववदभेदः
॥स्थूलप्रपंचोत्पत्तिमुपसंहरति॥एवंपंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः॥स्थूल

सूक्ष्मकारणप्रपंचानांव्यष्टिसमष्टिभूतानांप्रत्येकविवेक्षयाऽवांतरप्रपंचत्वमभिधा
येदानींतेषांसमष्टेरेकमहाप्रपंचत्वंदर्शयति॥एतेषांस्थूलसूक्ष्मकारणप्रपंचा
नामपिसमष्टिरेकोमहान्प्रपंचोभवति॥तत्रदृष्टांतमाह॥यथावांतरवनानांसम
ष्टिरेकंमहद्वनंभवति॥यथाऽवांतरजलाशयानांसमष्टिरेकोमहान्जलाशयः
॥यथाधवखदिरपलाशाद्यवांतरवनानांसमष्टिः॥समुदायविवक्षयाएकंम
हद्वनंभवति॥यथावापीकूपतडागाद्यवांतरजलाशयानांसमुदायविवक्षया
एकोमहान्जलाशयोभवति॥तथास्थूलसूक्ष्मकारणावांतरप्रपंचानांसमुदा
यएकोमहान्प्रपंचोभवतिइत्यर्थः॥एतदवांतरमहाप्रपंचोपहितानांविश्वतेजस
प्राज्ञानांवैश्वानरहिरण्यगर्भाव्याकृतानांचावांतरवनावच्छिन्नाकाशवदवांत

रज्जुसर्पायजलगतप्रतिबिंबाकाशवच्चाभेदइत्याह॥॥एतदुपहितंवैश्वानरादीश्व
रपर्यंतंचैतन्यमप्यवांतरवस्तावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबका
शवच्चैक्[redacted]एचैतन्यप्रपंचयोर्भेदसर्वंखल्विदंब्रह्मेतिश्रुत्याविरोधमाशंक्यप
रिहरति॥आभ्यांमहाप्रपंचतदुपहितचैतन्याभ्यांतन्नायःपिंडवदविविक्तंसद
नुपहितंचैतन्यंसर्वंखल्विदंब्रह्मेतिवाक्यस्यवाच्यंभवति।विविक्तंसच्चस्यम
पिभवति॥उक्तमहाप्रपंचतदवच्छिन्नचैतन्याभ्यांतन्नायःपिंडवदन्योन्यता
दात्म्याध्यासापनंयद्दृश्यतेतंतदनवच्छिन्नंचैतन्यंसर्वंखल्विदंब्रह्मेतिवाक्यैर्वा ३०
च्यंभवति॥अन्योन्यतादात्म्याध्यासानापन्नंसच्चस्यंभवतीत्यर्थः॥अध्यारोपप्रक
रणमुपसंहरति॥एवंवस्त्वन्यवस्त्वारोपोध्यारोपःसामान्येनप्रदर्शितः॥ईश्वरचै

तन्यैसामान्यतोमहाप्रपंचाध्यारोपप्रकारंसप्रपंचमभिधायेदानींप्रत्यगात्मनिविशेषा
ध्यारोपप्रकारंदर्शयितुमुपक्रमतेइदानीमित्यादिना॥विशेषाध्यारोपमेवाह॥इदा
मिति॥ ॥इदानींप्रत्यगात्मनिइदमिदंमारोपयतीतिविशेषउच्यते॥ ॥घनिप्राकृत
स्तु॥प्रत्यक्षादिसंनिहितस्यापत्यादिधर्मिणइदमिदमितिनिर्देशःक्रियते॥इदमि
दमित्यादरेवीप्सा॥तथाच॥अतिस्थूलबुद्धिस्तुइदमपत्यादिकमेवाहं॥अयंपुत्र
एवाहमित्यंतंबाह्यधर्मान्विशेषणात्मन्यध्यारोपयतीत्यर्थः॥अत्रश्रुतिमाह॥आ
त्मावैजायतेपुत्रइत्यादिश्रुतेः॥तत्रदृष्टांतमाह॥स्वस्मिन्निवस्वपुत्रेपिप्रेमदर्शना
त्पुत्रेदृष्टेनष्टेचमदमेवदृष्टंनष्टंश्वेत्यानुभवाच्चपुत्रआत्मेतिवदति॥यथास्व
शरीरेप्रेमदर्शनादात्मत्वभ्रमः॥एवंस्वपुत्रादिशरीरेपिप्रेमदर्शनादात्मभ्रमइत्य

र्थः॥अत्रानुरूपमनुभवमाचष्टे॥पुत्रइति॥एतदपेक्षयाविशिष्टबुद्धिरन्यः कश्चिद्
धिकारीस्वदेहमेवात्मानंमन्यतइत्याह॥चार्वाकस्तु॥अत्रापिश्रुतिमाह॥सवाएषपु
रुषोन्नरसमयइत्यादिश्रुतेः॥पुत्रादिशरीरस्यआत्मत्वाभावेयुक्तिंदर्शयन्पूर्वोक्ता
धिकारिणःसकाशात्स्वस्यचैलक्षण्यंदर्शयति॥यदीमंगृहात्स्वपुत्रंपरित्यज्यापि
स्वस्यनिर्गमनदर्शनात्॥देहस्यात्मत्वेऽनुभवंचप्रमाणयति॥॥स्मृत्वोहंकृत्वोद्
मित्याद्यनुभवाच्चस्थूलशरीरमात्मेतिवदति॥॥ततोप्युत्कृष्टःकोप्यधिकारीश्रुतियु
क्त्यनुभवेभ्यइंद्रियाण्यात्मेतिवदतिइत्याह॥॥अपरश्चार्वाकस्तेप्राणाःप्रजापतिमत्यब्रु ३१
युरित्यादिश्रुतेः॥॥इंद्रियाणामभावेशरीरचलनाभावात्कार्णेदंबधिरोहमित्याद्यनुभवा
च्चेंद्रियाण्यात्मेतिवदति॥ततोप्युत्तमोधिकारीकश्चित्श्रुतिप्रमाणानुभववलात्प्राण

वात्मेत्याह॥अपरश्चार्वाकोन्योंतरआत्माप्राणमयइत्यादिश्रुतेः॥प्राणाभावेइंद्रियादिच
लनायोगात्॥अहमन्नानावानहंपिपासावानित्याद्यनुभवाच्चप्राणआत्मेतिवदति॥ततो
विशिष्टाधिकारीकश्चित्स्वमतानुकूलश्रुत्यादिबलात्मनआत्मेत्याह॥अन्यस्तुचार्वा
कोन्योंतरात्मामनोमयइत्यादिश्रुतेः॥मनसिसतिप्राणादेःसत्त्वेभावात्॥अहंसंकल्पवान २
हंविकल्पवानित्याद्यनुभवाच्चमनआत्मेतिवदति॥उक्तेभ्यःपंचभ्योविलक्षणःकश्चिद्विज्ञा
नवादीश्रुत्यादिभिर्विज्ञानमात्मेत्याह॥योऽन्तस्त्वन्योंतरआत्माविज्ञानमयइत्यादिश्रुतेः॥
कर्तुरभावेकरणस्यज्ञानस्यभावात्॥अहंकर्त्ताभोक्तेत्याद्यनुभवाच्चबुद्धिरात्मेतिवदति॥
उक्तेभ्योतिरिक्तोप्राभाकरतार्किकोस्वमतोपयोगिश्रुत्यादिबलाद्ज्ञानमात्मेतिवदतइत्याह
॥प्राभाकरतार्किकोअन्योंतरआत्माआनंदमयइत्यादिश्रुतेः॥बुद्ध्यादीनामज्ञानेलयदर्शना

र्थः॥अत्रानुरूपमनुभवमाचष्टे॥पुत्रइति॥एतदपेक्षयाविशिष्टबुद्धिरन्यःकश्चिद-
धिकारीस्वदेहमेवात्मानंमन्यतइत्याह॥चार्वाकस्तु॥अत्रापिश्रुतिमाह'सवाएषपु
रुषोन्नरसमयइत्यादिश्रुतेः॥पुत्रादिशरीरस्यआत्मत्वाभावेयुक्तिंदर्शयन्पूर्वोक्ता
धिकारिणःसकाशात्स्वस्यवैलक्षण्यंदर्शयति॥प्रहीनग्रहात्स्वपुत्रेपरित्यज्यापि
स्वस्यनिर्गमनदर्शनात्॥देहस्यात्मत्वेऽनुभवंचप्रमाणतियेति॥स्थूलोहंकृशोह
मित्याद्यनुभवाच्चस्थूलशरीरमात्मेतिवदति॥ ॥ततोप्युत्कृष्टःकोप्यधिकारीश्रुतियु
क्तानुभवेभ्यइंद्रियाण्यात्मेतिवदतिइत्याह॥ ॥अपरश्चार्वाकस्तेप्राणाःप्रजापतिमत्यब्रु ३१
युरित्यादिश्रुतेः॥ ॥इंद्रियाणामभावेशरीरचलनाभावात्काणोहंबधिरोहमित्याद्यनुभवा
च्चेंद्रियाण्यात्मेतिवदति॥ततोप्युत्तमोधिकारीकश्चित्श्रुतिप्रमाणानुभववलात्प्राण

वात्मेत्याह॥अपरश्चार्वाकोन्योंतरआत्माप्राणमयइत्यादिश्रुतेः॥प्राणाभावेइंद्रियादिच
लनायोगात्॥अहमन्नानावानहंपिपासावानित्याद्यनुभवाच्चप्राणआत्मेतिवदति॥ततो
विशिष्टाधिकारीकश्चित्स्वमनानुकूलश्रुत्यादिबलात्मनएवात्मेत्याह॥अन्यस्तुचार्वा
कोन्योंतरात्मामनोमयइत्यादिश्रुतेः॥मनसिसुप्तेप्राणादेःशरीरस्याभावात्॥अहंसंकल्पवान
हंविकल्पवानित्याद्यनुभवाच्चमनआत्मेतिवदति॥उक्तेभ्यःपंचभ्योविलक्षणःकश्चिद्विज्ञा
नवादीश्रुत्यादिभिर्विज्ञानमात्मेत्याह॥योद्वितीयोन्योंतरआत्माविज्ञानमयइत्यादिश्रुतेः॥
कर्तुरभावेकरणस्यशरीरवत्यभावात्॥अहंकर्ताभोक्तेत्याद्यनुभवाच्चबुद्धिरात्मेतिवदति॥
उक्तेभ्योतिरिक्तोप्राभाकरतार्किकोस्वमतोपयोगिश्रुत्यादिबलाद्विज्ञानमात्मेतिवदतइत्याह
॥प्राभाकरतार्किकोन्योंतरआत्माआनंदमयइत्यादिश्रुतेः॥बुद्ध्यादीनामज्ञानेलयदर्शना

त्।।अहमज्ञोऽहमज्ञानीत्यादयनुभवाच्चअज्ञानमात्मेतिवदन्तःभट्टस्तु।।अज्ञानावच्छिन्नंचैतन्य
मात्मेत्याह।।अज्ञानघनएवानंदमयइत्यादिश्रुतेः।।सुषुप्तोप्रकाशाप्रकाशासद्भावात्माम
हंनजानामीत्यादयनुभवाच्च।।अज्ञानोपहितंचैतन्यमात्मेतिवदन्ति।।बौद्धैकदेशीकश्चिच्छु
न्यादिभिःशून्यमात्मेतिवदति।। अपरोबौद्धअसदेवेदमग्रआसीदित्यादिश्रुतेः।। सुषुप्तोस
र्वाभावात्।।अहंसुषुप्तोनासमित्युत्थितस्यस्वाभावपरामर्शविषयानुभवाच्चशून्यमात्मेति
वदति।।अधुनापुत्रादिशून्यपर्यंतानामात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात्पूर्वपूर्वमत
स्योत्तरोत्तरमतबाध्यत्वाच्चदृश्यत्वजडत्वादिहेतुकदंबकैश्चानात्मत्वंप्रसिद्धमेवेतिप्रतिपा ३२
दयितुंप्रतिजानीते।।एतेषांपुत्रादीनामनात्मत्वमुच्यते।।पुत्राद्यात्मत्ववादिनामतिमंदाधिका
रित्वान्नेःप्रतिपादितश्रुत्यादेरपिपूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात्पुत्रादिशून्यांतानामनात्मत्वं

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

प्रसिद्धमेवेतिप्रतिज्ञातमेवार्थंप्रकटयति।। ।।एतैरतिप्राकृतादिवादिभिरुक्तेषुश्रुतिषु
नयस्वभावाभासेषुपूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवा
भासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वंस्थितमेव।। ।।ननुपुत्रादिशून्यपर्यंतानां
मनात्मत्वेसिद्धेकस्तर्ह्यहंप्रत्ययविषयआत्मेत्याशंक्यअस्थूलादिनिषेधवाक्यजात
बोधितंसत्यंज्ञानमनंतंब्रह्मेत्यादिविधिवाक्यकोटिबोधितंयत्सत्यज्ञानानंतानंदाद्व
यंब्रह्मतदेवाहमात्मेवनमितिप्रबलश्रुतियुक्त्यनुभवैःप्रतिपादयितुमाह।। ।।किंच।।प्र
त्यगस्थूलोचक्षुरेत्राणोऽमनाःकर्त्रीचैतन्यंचिन्मात्रंसदित्यादिप्रबलश्रुतिविरोधाद
स्यपुत्रादिशून्यपर्यंतस्यजडस्यचैतन्यभास्यत्वेनघटादिवदनात्मकत्वात्।।अस्थूला
दिप्रबलश्रुतिवाक्यैःपुत्रादिशून्यपर्यंतात्मातिरिक्तात्मस्वरूपप्रतिपादनात्पुत्रादीनां

जडत्वादिहेतुभिरनात्मत्वमित्यर्थः॥अस्मिन्नर्थेप्रबलविद्वदनुभवंप्रमाणयति॥ ॥अ
हंब्रह्मेतिविद्वदनुभवप्राबल्याच्च॥पुत्रादिश्रुत्यादीनांदौर्बल्यंदर्शयति॥तत्तत्श्रुतियु
क्त्यनुभवाभासानांबाधितत्वादपिपुत्रादिशून्यपर्यंतमखिलमनात्मैव॥ ॥अतस्तद्भास
कंनित्यशुद्धबुद्धमुक्तसत्यस्वभावंप्रत्यक्चैतन्यमेवात्मवस्तुइतिवेदांतविद्वदनु
भवः॥यतःपुत्रादीनांजडत्वादिहेतुभिरनात्मत्वं॥अतःपुत्रादिभासकनित्यशुद्ध
त्वादिस्वरूपमेवात्मवस्तुइत्यर्थः॥नन्विदंविरुद्धंयत्पुत्रादीनामात्मत्वप्रतिपाद
कश्रुतीनामप्रामाण्यंअस्थूलादिश्रुतीनांप्रामाण्यमिति॥नहिवेदवाक्येषुकेषांचि
दप्रामाण्यंकेषांचित्प्रामाण्यमितिवाच्यंकुतःप्रतिपादयितुं॥एवंचेत्पुत्रादिश्रुतीनांप्रा
माण्यं॥अस्थूलादिवाक्यानामप्रामाण्यमिति वैपरीत्यंकिंनस्यात्॥वेदवाक्यत्वाविशे

षात्॥किंकेषांचिद्वेदांतवाक्यानामप्रामाण्यप्रतिपादनार्थमिदंप्रकरणमारब्धं॥अतः
कथंनिर्णयइतिचेत्॥अत्रोच्यतेपुत्रादिश्रुतीनांसर्वथैवप्रामाण्यंनास्तीतिननिश्चि
तं॥किंच॥अस्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्स्वार्थतात्पर्याभावाच्चैषांस्थूला
दिरुंधतीन्यायेनपूर्वपूर्वनिराकरणद्वारासूक्ष्मवस्तूपदेशेनात्पर्यमित्येतावदेवप्रतिपा
द्यते॥तथाहि॥ध्रुवमरुंधतींचदर्शयतीतिविधिबलाद्ध्रुवधोरुंधतीदर्शनेनाशे
परमसूक्ष्मरूपायाअरुंधत्याःप्रथमकक्षायामेवप्रतिपत्तुमशक्यत्वात्यथमंचंद्र
ज्योतिरूपारुंधतीसौंतेतत्रचंद्राभिन्नतारकारुंधतीत्युच्यते॥ततश्चेदितरतारका
भिन्नासप्ततारकात्मकाऽरुंधतीत्युच्यते॥तदनंतरंद्वितरतारकाचतुष्टयभिन्नातारका
त्रितयात्मकेत्युच्यते॥ततस्तन्मध्यतारकेत्युच्यते॥ततस्तत्समीपवर्त्तिनीपरमसूक्ष्मा

रुंधतीत्युक्तं॥नचैतावतानतेषांपंचानांवाक्यानांपरस्परविरुद्धार्थप्रतिपादकत्वेनाप्रा
माण्यंवाक्यंप्रतिपादयितुं॥किंतु॥प्रतिपत्तृबुद्ध्यनुसारेणसोपानक्रमवत्पूर्वपूर्वनि
राकरणद्वारासूक्ष्माऽरुंधतीप्रतिपादनेनात्पर्यात्॥तद्वदत्रापिअन्नेन्नेयः प्राणमयोम
नोमयोविज्ञानमयआनंदमयआत्माब्रह्मपुछंप्रतिष्ठेतिपुछब्रह्मपर्यवसितानांपं
चकोशवाक्यानामपिपरस्परविरुद्धार्थप्रतिपादकत्वेपिप्रतिपत्तृबुद्ध्यनुसारेणसो
पानक्रमवत्पूर्वपूर्वनिराकरणद्वारापरमसूक्ष्मपुछब्रह्मप्रतिपादनेनात्पर्यात्॥
तस्मात्सर्वेषांवेदवाक्यानांसाक्षात्परंपरयावाअद्वितीयवस्तुप्रतिपादनेनात्पर्यात्सा
माण्याविरोधइतिसंक्षेपः॥विक्षेपाध्यारोपप्रकरणमुपसंहरति॥एवमध्यारोपः॥ ॥
आत्मवस्तुनिमिथ्याप्रपंचस्यसामान्यतोविक्षेपतश्चअध्यारोपप्रकारंसप्रपंचमभिधा

येदानींतदपवादप्रकारंवक्तुमारभते॥अपवादोनामेति॥ब्रह्मसंगोदासीनेपरमात्मव
स्तुनितद्विवर्त्तीभूताज्ञानादिमिथ्याप्रपंचस्यचिद्वस्तुमात्रावक्षेपतयाअवस्थानमेवा
पवादइतिवक्तुंप्रथमंलौकिकंदृष्टांतमाह॥रज्जुविवर्त्तस्यसर्पस्यरज्जुमात्रत्ववत्ववस्तु
विवर्त्तस्यावस्तुनोऽज्ञानादेःसप्रपंचस्यवस्तुमात्रत्वंरज्जुस्वरूपापरित्यागेनसर्पका
रेणभासमानस्यरज्जुविवर्त्तस्यापवादोनामाधिष्ठानरज्जुमात्रतयाअवस्थानवद्वि
द्विवर्त्तस्याज्ञानादिप्रपंचस्यनाशोनामचिन्मात्रत्वेनावस्थानमित्यर्थः॥अन्नयथास्व
रूपेणावस्थितस्यवस्तुनोऽन्यथाभावोद्विधाभवति॥परिणामभावोविवर्त्तभावश्चे
ति॥तत्रपरिणामभावोनामवस्तुनःयथार्थतःस्वस्वरूपपरित्यागेनस्वरूपांतरा
पत्तिः॥यथादुग्धमेवस्वस्वरूपंपरित्यज्यदध्याकारेणपरिणमते॥विवर्त्तभावस्तु॥

वस्तनःस्वस्वरूपापरित्यागेनस्वरूपांतरेणमिथ्याप्रतिपत्तिः"यथारज्जुरेवस्वस्वरू
पापरित्यागेनसर्पाकारेणमिथ्याप्रतिभासते॥अत्रवेदांतेब्रह्मणिप्रपंचभानस्यप
रिणामभावोनांगीक्रियते॥दुग्धादिवद्दुग्धणोविकारित्वसंगादनित्यतादिदोष
पत्तेः॥विवर्त्तभावांगीकारेतुनायंदोषः॥ब्रह्मणिप्रपंचभानस्यमिथ्यात्वेनविकारित्वा
भावात्॥तदुक्तं॥अधिष्ठानावशेषोहिनान्यःकल्पितवस्तुनइति॥तस्मात्तद्विवर्त्त
स्यप्रपंचस्यचिन्मात्रावशेषतयावस्थानमेवापवादइतिभावः॥अस्मिन्नर्थेयंथां
तरसंवादंदर्शयति॥तदुक्तं॥सतत्वतोन्यथाप्रथाविकारइत्युदीरितः॥अतत्त्वतो ३५
न्यथाप्रथाविवर्त्तइत्युदीरितः॥सामान्यतोदर्शितामपवादप्रक्रियांविस्तरेणप्रतिपाद
यितुंप्रतिजानीतेतथाहि॥स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिंवैपरीत्येनतत्त्वकार

णरूपेणावस्थानमेवअपवादइत्याह॥ ॥एतद्भोगायतनंचतुर्विधंसकलंस्थूलशरी
रजातंभोग्यरूपान्नपानादिकंएतदायतनभूतभूरादिचतुर्दशभुवनानि॥एतदाश्र
यंब्रह्मांडंचएतत्सर्वमेषांकारणरूपंपंचीकृतभूतमात्रंभवति॥एतानिशब्दादिविष
यसहितानिपंचीकृतानिभूतानिसूक्ष्मशरीरजातंचएतत्सर्वमेतेषांकारणरूपापं
चीकृतभूतमात्रंभवति॥एतानिसत्वादिगुणसहितानिअपंचीकृतानि॥उत्पत्तिक्रमे
णएतत्कारणभूताज्ञानोपहितचैतन्यमात्रंभवति॥एतदज्ञानमज्ञानोपहितंचै
तन्यंचेश्वरादिकं॥एतदाधारभूतानुपहितचैतन्यरूपंतुरीयंब्रह्ममात्रंभवति॥एत
त्स्थूलशरीरंस्वाश्रयब्रह्मांडसहितंस्वकारणभूतपंचीकृतेषुपंचमहाभूतेषुली
नंसन्नमात्रतयाऽवतिष्ठते॥तानिपंचीकृतानिभूतानिशब्दादिसहकृतानिसप्तदश

वयवात्मकलिंगशरीराणिचस्वकारणेघपंचीकृतभूतेषुलीनानिभवंति॥तान्यपं
चीकृतानिभूतानिसत्वादिगुणसहितानिस्वकारणाज्ञानोपहितचैतन्येलीनानिभ
वंति॥तज्ज्ञाज्ञानोपहितचैतन्यंसर्वज्ञेत्वादिविशिष्टंचस्वाधारभूतानुपहितचैतन्ये
लीनंभवति॥चैतन्यमेवावशिष्यतइत्यर्थः॥फलितमाह॥आभ्यामध्यारोपापवादाभ्यां
तत्वंपदार्थशोधनमपिसिद्धंभवति॥तत्वंपदार्थशोधनप्रकारंप्रपंचयितुंप्रतिजानी
ते॥तथाहि॥अज्ञानादिसमष्टिरेतदुपहितंसर्वज्ञत्वादिविशिष्टंचैतन्यंएतदनुपहितं
चैतन्यंचैतत्त्रयंतत्तायःपिंडवदेकतेनावभासमानंतत्पदवाच्यार्थोभवति॥अज्ञो ३६
तंतदवच्छिन्नेश्वरश्चैतन्यंतदनुपहितंचैतन्यंएतत्त्रयंतत्तायःपिंडवदन्योन्यतादात्म्या
ध्यासेनैकतेनप्रतीयमानंसत्तत्पदवाच्यार्थोभवतीत्यर्थः॥तत्पदलक्ष्यार्थमाह॥एतदु

पाधुपहिताधारमनुपहितंचैतन्यंतत्पदलक्ष्यार्थोभवति॥अज्ञानतदवच्छिन्नेश्वरचै
तन्यस्याधारभूतंयदनुपहितंचैतन्यंतन्नाभ्यांविविक्तंसद्वेदविवक्षयातत्पदल
क्ष्यार्थोभवतीत्यर्थः॥त्वंपदवाच्यार्थमाह॥ ॥अज्ञानाद्व्यष्टिरेतदुपहितमज्ञत्वा
दिविशिष्टंचैतन्यंएतदनुपहितंचैतत्त्रयंतत्तायःपिंडवदेकतेनावभासमानंत्वं
पदवाच्यार्थोभवति॥व्यष्टिभूतमज्ञानंयदंतःकरणंतदवच्छिन्नंजीवचैतन्यंतदनु
पहितंचैतन्यंचैतत्त्रयंतत्तायःपिंडवत्परस्परतादात्म्याध्यासेनाभेदविवक्षया
त्वंपदवाच्यार्थोभवतीत्यर्थः॥त्वंपदलक्ष्यार्थमाह॥ ॥एतदुपाध्युपहिताधारभू
तमनुपहितंप्रत्यगानंदंतुरीयंचैतन्यंत्वंपदलक्ष्यार्थोभवति॥ ॥चैतःकरणोप
हितचैतन्यत्रयस्याधारभूतंयदनुपहितंप्रत्यगानंदतुरीयंचैतन्यंत्वंपदलक्ष्या

र्थोभवतीत्यर्थः॥पदार्थमभिधायवाक्यार्थमाह॥अथमहावाक्यार्थोवर्ण्यते॥ननुजीवे
श्वरयोःकिंचित्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यंतविलक्षणयोस्तत्त्वमस्यादिमहावा
क्यानिपरस्परविरुद्धार्थंप्रतिपादकानिकथंअखंडैकरसंब्रह्मप्रतिपादयंतीत्योशं
क्यासाक्षादेकप्रतिपादकत्वाभावेपिलक्षणयासंबंधत्रयेणअखंडैकार्थंप्रतिपा
दयंतीत्याह॥॥इदंतत्त्वमसिवाक्यंसंबंधत्रयेणाखंडार्थबोधकंभवति॥संबंध
त्रयस्वरूपमाह॥संबंधत्रयंनामपदयोःसामानाधिकरण्यंपदार्थयोर्विशेषण
विशेष्यभावः॥त्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति॥पदार्थत्यगात्मनांसंबं
धत्रयसद्भावेहेतुसंमतिमाह॥तदुक्तं॥सामानाधिकरण्यंचविशेषणविशेष्यता॥
लक्ष्यलक्षणसंबंधःपदार्थत्यगात्मनामितिपदयोःसामानाधिकरण्यंउदाहरणनि

र्शकृत्वाप्रदर्शयति॥सामानाधिकरण्यसंबंधस्तावत्॥यथासोयंदेवदत्तइत्यस्मिन्
वाक्येतत्कालविशिष्टदेवदत्तवाचकसत्ताद्रूपस्यैतत्कालविशिष्टदेवदत्त
वाचकायंशब्दस्यचैकस्मिन्पिंडेत्योर्यसंबंधः॥भिन्नप्रवृत्तिनिमित्तयोःशब्द
योरेकस्मिन्वर्तृतिःसामानाधिकरण्यं॥तच्चसोयंदेवदत्तइतिवाक्येसइतित्य
दस्यतत्कालतद्देशविशिष्टंप्रवृत्तिनिमित्तं॥एतत्कालेतद्देशविशिष्टमयंश
ब्दस्यप्रवृत्तिनिमित्तं॥तथाचभिन्नप्रवृत्तिनिमित्तयोःसोयंशब्दयोरेकस्मिन्देवद
त्तपिंडेतात्पर्यसंबंधःसामानाधिकरण्यमित्यर्थः॥उक्तमर्थंदृष्टांतिकेयोजय
ति॥तथाचतत्त्वमसीतिवाक्येपिपरोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्य
अपरोक्षत्वादिविशिष्टचैतन्यवाचकंत्वंपदस्यचैकस्मिन्चैतन्येतात्पर्यंसं

बंधः॥तथातत्त्वमसीतिवाक्येपिपरोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यंतत्पदप्रवृत्तिनिमि
त्तं॥अपरोक्षत्वकिंचित्त्वादिवैशिष्ट्यंत्वंपदप्रवृत्तिनिमित्तं॥तथाच॥भिन्न
प्रवृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिन्चैतन्येतात्पर्येसंबंधः सामानाधिकर
ण्यमित्यर्थः॥विशेषणविशेष्यभावसंबंधस्वरूपमाह॥ ॥विशेषणविशेष्यभाव
संबंधस्तुयथानेत्रेवाक्येसन्नाह्यार्थतत्कालविशिष्टदेवदत्तस्यअयंशब्दा
र्थैतत्कालविशिष्टदेवदत्तस्यचअन्योन्यभेदव्यावर्त्तकतयाविशेषणविशे
ष्यभावसंबंधः॥व्यावर्त्तकंविशेषणंव्यावर्त्यंविशेष्यंतथाचसोयंदेवदत्तइति
वाक्यएवअयंशब्दवाच्योयोसावेतत्कालैतद्देशसंबंधविशिष्टदेवदत्तपिंडः
अयंसइतिनछब्दवाच्यातत्कालतद्देशसंबंधविशिष्टदेवदत्तपिंडाद्भिन्नोनेतिय

दाप्रतीयते॥तदातछब्दवाच्यस्य यंशब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतयाविशेषणत्वं
॥अयंशब्दार्थस्यव्यावर्त्यत्वंविशेष्यत्वं॥यदाचसइतितत्शब्दवाच्यतत्कालत
द्देशविशिष्टदेवदत्तपिंडःसअयमितिइदंशब्दवाच्यादेतत्कालैतद्देशसंब
धविशिष्टादस्मात्देवदत्तपिंडान्नभिद्यतेइतियदाप्रतीयते॥तदाअयंशब्द
वाच्यस्यतछब्दार्थनिष्ठभेदव्यावर्त्तकतयाविशेषणत्वं॥तछब्दार्थस्यव्यावर्त्यत्वं
विशेष्यत्वं॥तथाच॥अयमेवसःसएवायंइत्यन्योन्यभेदव्यावर्त्तकतयासोयंश
ब्दार्थयोःपरस्परंविशेषणविशेष्यभावइत्यर्थः॥उक्तंविशेषणविशेष्यभावंदार्ष्ट
न्तिकेयोजयति॥तथाअत्रापिवाक्येतत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य
त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्यचान्योन्यभेदव्यावर्त्तकतयाविशेष

णविशेष्यभावः॥इहतत्त्वमसीतिवाक्येपित्वंपदवाच्यंयदपरोक्षत्वकिंचित्ज्ञत्वादि
विशिष्टचैतन्यंतत्पदवाच्यात्सर्वज्ञत्वादिविशिष्टचैतन्याच्चभिद्यतइतियदाप्रती
येते॥तदातच्छब्दार्थस्यत्वंपदार्थनिष्ठभेदव्यावर्तकतयाविशेषणत्वं॥त्वंपदार्थस्यवि
शेष्यत्वं॥यदाचतत्पदवाच्यंयत्सर्वज्ञत्वादिविशिष्टचैतन्यंत्वंपदवाच्यात्किंचित्ज्ञ
त्वादिविशिष्टचैतन्यान्नभिद्यतइतियदाप्रतीयते॥तदात्वंपदार्थस्यतत्पदार्थनिष्ठ
भेदव्यावर्तकत्वेनविशेषणत्वं॥तत्पदार्थस्यविशेष्यत्वं॥तथाचत्वंतदसितत्त्वम
सीतितत्त्वंपदार्थयोःपरस्परभेदव्यावर्तकत्वेनपरस्परंविशेषणविशेष्यभावइ ३९
त्यर्थः॥क्रमप्राप्तंलक्ष्यलक्षणभावसंबंधस्वरूपंनिरूपयितुमाह॥लक्ष्यलक्षण
संबंधस्तु॥यथातत्त्वमसीत्यादौयोस्तदर्थयोर्विरुद्धतत्कालविशिष्टत्वपरि

त्यागेनाविरुद्धदेवदत्तेनसहलक्ष्यलक्षणेसेभावः॥असाधारणधर्मघटितपदंवा
क्यंलक्षणं॥तत्प्रतिपाद्यमवशिष्टंवस्तुलक्ष्यं॥तथाचसोयंदेवदत्तइत्यस्मिन्ने
ववाक्येसोयंचात्रयोस्तदर्थयोर्विरुद्धतत्कालतद्देशविशिष्टत्वपरिहारेण
विरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिंडेनसहदेवदत्तत्वविशिष्टदेवदत्तवा
चकशब्दस्यलक्ष्यलक्षणभावसंबंधइत्यर्थः॥उक्तमर्थंदार्ष्टांतिकेयोजयति॥
॥तथात्रापिवाक्येतत्त्वंपदयोस्तदर्थयोर्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्व
परित्यागेनाविरुद्धचैतन्येनसहलक्ष्यलक्षणभावः॥इदापित्वंतेपदयोस्तदर्थ
योर्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनतत्त्वंपदाभ्यांलक्ष्याविरु
द्धचैतन्येनसहतत्त्वंपदयोर्लक्ष्यलक्षणभावःसंबंधइत्यर्थः॥अत्रतत्त्वंपदयो

त्वदर्थयोश्चत्यक्तविरुद्धांशयोर्लक्षणत्वे॥अखंडचैतन्यस्यलक्ष्यत्वमितिभावः॥ननु तत्वमस्यादिवाक्यानांलक्ष्यलक्षणभावसंबंधद्वारकेणचैतन्यबोधकत्वमुक्तं॥ ॥अन्यत्रतुज्ञात्रैतेषांवाक्यानांभागलक्षणयैवचैतन्यबोधकत्वंप्रतिपाद्यतेत त्वमस्यादिवाक्येषुलक्षणाभागलक्षणेत्यादिविरोधमाशंक्यसंज्ञाभेदोनवस्तु भेदइत्याह॥ ॥इयमेवभागलक्षणेत्युच्यते॥ ॥तत्वमस्यादिवाक्यानांविरुद्धां शपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेवभागलक्षणेत्युच्यतेइत्यर्थः॥न नुयथानीलोत्पलमितिवाक्येनीलत्वविशिष्टनीलगुणस्योत्पलत्वविशिष्टोत्प लद्रव्यस्यचस्वव्यतिरिक्तशुक्लादिगुणांतरपटादिद्रव्यांतरव्यावर्त्तकतेनविशे षणविशेष्यभावनिरूपितभिन्नसंसर्गस्यनीलगुणवैशिष्ट्यस्यवाक्यार्थत्वं॥तथे

हापितत्वमस्यादिवाक्येतत्पदार्थस्यपरोक्षत्वादिविशिष्टेश्वरचैतन्यस्यत्वंपदार्थ स्यापरोक्षत्वादिविशिष्टजीवचैतन्यस्यचान्योन्यभेदव्यावर्त्तकतयाविशेषणवि शेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वोभयनिरूपितसंसर्गोवासर्वज्ञत्वादिविशिष्टस्य किंचिज्ज्ञत्वादिविशिष्टसहैक्यंवावाक्यार्थोभवतीत्याशंक्यदृष्टांतदार्ष्टांतिकयो र्वैषम्यान्नैवमित्याह॥अस्मिन्नित्यादिना॥अस्मिन्वाक्येनीलमुत्पलमित्यस्मिन्नत्व मसीतिवाक्येभीलोत्पलमित्यादिवाक्यतत्संसर्गोवाविशिष्टोवावाक्यार्थोनसंग छतइत्यर्थः॥नीलोत्पलमितिवाक्यस्यसंसर्गवैशिष्ट्यार्थप्रतिपादकत्वकल्पनेवि रोधाभावंदर्शयति॥तत्रतुनीलपदार्थनीलगुणस्य॥उत्पलपदार्थोत्पलद्रव्यस्यच शौक्लपटादिभेदव्यावर्त्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरवि

ROYAL ASIATIC SOCIETY BOMBAY BRANCH

शिष्टस्यान्यतरस्यतदेकस्यवाक्यार्थत्वांगीकारेप्रमाणांतरविरोधाभावात्तत्ता
क्यार्थःसंगछते॥नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्ग
स्यनीलगुणविशिष्टोत्पलयोरैक्यस्यवाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाणांतरवि
रोधाभावान्नचतथासंगछतइतिभावः॥तत्त्वमसीतिवाक्येतुतत्पदार्थयोःकिंचि
ज्ज्ञत्वादिविशिष्टजीवचैतन्यस्यवासर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्यवातदुभय
विशिष्टचैतन्यैक्यस्यवावाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाणांतरविरोधात्सर्वसमा
दोषमुद्भावयति॥अत्रतुतदर्थपरोक्षत्वादिविशिष्टचैतन्यस्यलक्ष्यार्थस्यपरोक्षत्वा
दिविशिष्टचैतन्यस्यचान्योन्यभेदव्यावर्त्तकतयाविशेषणविशेष्यभावसंसर्गी
स्यान्यतरविशिष्टस्यान्यतरस्यवातदैक्यंवावाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाणवि

रोधाद्वाक्यार्थोनसंगछते॥तदुक्तं॥संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः॥
अखंडैकरसत्वेनवाक्यार्थोविदुषांमतइति॥ननुतत्त्वमस्यादिवाक्यमखंडा
र्थंकथंबोधयति॥तद्धिलक्षणयावाकिमजहल्लक्षणयाआहोस्विज्जहदजहल्ल
क्षणेत्याद्येदूषणमाह॥अत्रतत्त्वमसीतिवाक्येजहल्लक्षणानसंगछतेइत्यन्व
यः॥तदेवदर्शयितुंजहल्लक्षणायाउदाहरणंतावदाह॥अत्रतु॥गंगायांघो
षःप्रतिवसतीतिवज्जहल्लक्षणापिनसंगछते॥मानांतरविरोधेतुमुख्यार्थस्यप
रित्यागेहि॥मुख्यार्थनाविनाभूतेप्रवृत्तिर्लक्षणेष्यतेइतिवचनाद्गंगायांघोषवस्मा
संभवाद्गंगायांघोषइतिवाक्यस्यमुख्यार्थविरोधेसतिमुख्यार्थंपरित्यज्यलक्षण
माहत्यातत्संबंधितीरेघोषावस्थानप्रतिपादनात्तत्रजहल्लक्षणांगीकारोयु

ज्यतइत्याह॥तत्रयुगंगाघोषयोराधाराधेयभावलक्षणस्यवाक्यार्थस्यानुपपत्तेर्विरुद्ध
त्वात्॥वाक्यार्थमनुपपत्तेःपरित्यज्यतत्संबंधितारलक्षणयायुक्तत्वाज्जहल्लक्षणा
संगच्छते॥आधाराधेयभावलक्षणंसर्वथापरित्यज्येत्यर्थः।तत्त्वमसीतिवाक्येघा
कघतिज्ञातंजहल्लक्षणासंभवमाविष्करोति॥अत्रतुपरोक्षापरोक्षचैतन्यैकत्व
लक्षणस्यवाक्यार्थस्यभागभाक्त्वेविरोधात्॥तुशब्दःपूर्वस्माद्वैषम्यंद्योतयति॥त
त्त्वमसीतिवाक्येपरोक्षापरोक्षचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यविरोधाभावा
त्॥परोक्षत्वापरोक्षत्वप्रतिपादकत्वान्नोविरोधात्चैतन्यैकत्वेविरोधाभावाज्ज
गद्घोषादिवाक्यवत्सर्वात्मनामुख्यार्थपरित्यागासंभवाज्जहल्लक्षणानसंभवती
त्यर्थः॥तत्रहेतुमाह॥भागांतरमपिपरित्यज्यान्यलक्षणायाअयुक्तत्वाज्जहल्ल

क्षणानसंगछते॥विरुध्धयोःपरोक्षत्वापरोक्षत्वयोरेकत्वासंभवेनतत्परित्यागेपिचैत
न्यभागस्यैकत्वविरोधाभावान्नत्यागोनयुज्यतइत्यर्थः॥ननुयथागंगायांघोषःप्रति
वसतीतिवाक्येगंगापदंस्ववाहलक्षणस्वार्थंपरित्यज्यस्वसंबंधितारपदार्थंलक्ष
यति॥तथाचतत्त्वमसीतिवाक्येतत्पदंस्वार्थंपरोक्षत्वविशिष्टंपरित्यज्यजीवचै
तन्यंलक्षयतुएवंत्वंपदमपिस्वार्थंकिंचिज्ज्ञत्वादिविशिष्टंपरित्यज्यईश्वरचैत
न्यंवालक्षयतु॥तस्माज्जहल्लक्षणैवभवतीत्याशंक्यनिराकरोति॥नचगंगाप
दंस्वार्थंपरित्यागेनतीरपदार्थंयथालक्षयति॥तथातत्पदंत्वंपदंवास्वार्थं
परित्यागेनत्वंपदार्थंतत्पदार्थंवालक्षयतुअतःकुतोजहल्लक्षणानसंगछत
इतिवाच्यं॥निराकरणप्रकारमेवाह॥तत्रेत्यादि॥तत्रतीरपदाश्रवणेनतदर्थाप

तीतौलक्षणयातत्प्रतीत्यपेक्षायामपितत्पदयोःश्रूयमाणत्वेनतदर्थप्रतीतौलक्ष
णयापुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्॥श्रुतवाक्यस्यमुख्यार्थवि
रोधेमुख्यार्थसंबंधिन्यश्रुतपदार्थेलक्षणेति सर्वजनप्रसिद्धं॥तथाचगंगायांघो
षइत्यत्रश्रुतवाक्यार्थस्यगंगाघोषयोराधाराधेयभावसंबंधस्यविरोधेसतिश्रू
यमाणंगंगापदंस्वार्थपरित्यागेनतीरपदार्थंलक्षयतीतियुक्तं॥गंगापदार्थस्य
तीरपदार्थप्रतीतिसापेक्षत्वात्॥इहतुश्रूयमाणतत्त्वंपदयोर्मुख्यतयैवतदर्थ
सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टयैक्यंतौत्यागमपिलक्षणयातत्पदेनत्वंपदार्थ
प्रतीत्यपेक्षाभावात्त्वंपदेनतत्पदार्थप्रतीत्यपेक्षाभावाच्चमुख्यार्थसंभवति॥
लक्षणायाअन्याप्यतात्रहत्लक्षणापिनसंभवतिहितीयंपसंदूषयति॥अत्रनोजो

धावतीतिवाक्यवदजहल्लक्षणापिनसंभवति॥अत्रतत्त्वमसीतिवाक्येअजहल्लक्षणा
पिनसंभवतीत्यन्वयः॥कुतइत्यतआह॥तत्रशोणगुणगमनलक्षणस्यवाक्या
र्थस्यविरुद्धत्वात्तदपरित्यागेनतदाश्रयाश्वादिलक्षणयातद्विरोधपरिहारसंभवात्
अजहल्लक्षणासंभवति॥अत्रतुपरोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्यवा
क्यार्थस्यविरुद्धत्वात्तदपरित्यागेनतत्संबंधिनोयस्यकस्यचिदर्थस्यलक्षितत्वेपि
नहिरोधपरिहारासंभवेत्अजहल्लक्षणापिनसंभवत्येव॥तत्रशोणोधावतीत्या
दिवाक्येशोणगुणस्यगमनासंभवेनवाक्यस्यमुख्यार्थविरोधेसतिश्रूयमाणंशोण
पदंस्वार्थंपरित्यागेनतदाश्रयमश्वादिकंलक्षयतीतियुक्तं॥अत्रतुतत्त्वमस्यादिवा
क्येतत्त्वंपदार्थस्यपरोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्यमुख्यस्यवा

कार्थस्यविरुद्धत्वात्परोक्षत्वपरित्यागेनतर्हिशिष्टचैतन्यलक्षणार्थस्यल
क्षितत्वेपितद्विरोधपरिहाराभावादजहल्लक्षणानसंभवतीत्यर्थः॥ननुतत्त्व
दंस्वार्थविरुध्द परोक्षत्वादिधर्मंपरित्यज्यअविरुद्धचैतन्यांशपरित्यागेन
त्वंपदार्थकिंचिज्ज्ञत्वादिविशिष्टंजीवचैतन्यंलक्षयतु॥त्वंपदंवास्वार्थविरुध्धा
परोक्षत्वादिधर्मंपरित्यज्यअविरुद्धचैतन्यांशपरित्यागेनतत्पदार्थसर्वज्ञता
दिविशिष्ट मीश्वरचैतन्यंलक्षयतु॥किंभागलक्षणागीकारेणत्यागंकनिरक
रोति॥ ॥नचतत्त्वंपदंवास्वार्थविरुद्धांशपरित्यागेनअंशांतरसहितंत्वंप ४४
दार्थंतत्पदार्थंवालक्षयतु॥अतःकथंभागलक्षणागीकरणंइति
वाच्यं॥एकेनपदेनस्वार्थांशपदार्थांतरोभयलक्षणासंभवात॥ ॥एकेन

तत्पदेनत्वंपदेनवास्वार्थांशपरित्यागेनस्वार्थांशपदार्थांतरोभयलक्षणासंभवा
दित्यर्थः॥अजहल्लक्षणासंभवेहेत्वंतरमाह॥पदांतरेणतदर्थप्रतीतौसत्यांल
क्षणयापुनस्तत्त्वमसीत्यपेक्षाभावाच्चतत्त्वंपदेनवातदर्थप्रतीतौसत्यांलक्ष
णयापुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः॥अतःपरिशेषात्तृतीय
पक्षएवस्वीकर्त्तव्यइत्युपसंहरति॥तस्माद्यथासोयंदेवदत्तइतिवाक्यंतदर्थो
वानतत्कालविशिष्टतत्कालविशिष्टदेवदत्तलक्षणस्यवाक्यार्थस्यांशेविरोधात्
विरुद्धतत्कालेतत्कालविशिष्टांशंपरित्यज्याविरुद्धदेवदत्तांशमात्रंलक्षयति॥
तस्मादिति॥यस्मात्तत्त्वमस्यादिवाक्येजहल्लक्षणाऽजहल्लक्षणयोरसंभवस्तस्मा
ज्जहदजहल्लक्षणयाविरुद्धांशंपरित्यज्यअविरुद्धाखंडचैतन्यमात्रंलक्षयती

वेदां-दी- ४५

त्तियोजना॥तत्रदृष्टांतमाह॥यथेतियथासोयंदेवदत्तवाक्येप्रागुक्तजहल्लक्षणाऽजह
ल्लक्षणयोरसंभवेनतदर्थस्यतत्काल तद्देशविशिष्टस्यद्देशविशिष्टस्य दे
वदत्तलक्षणवाक्यार्थस्यैकस्मिन्नंशेतत्कालेतत्कालवैशिष्ट्यभागेविरोधदर्शना
त्तत्परित्यागेनाविरुद्धदेवदत्तपिंडमात्रंलक्षयतीत्यर्थः॥मानांतरविरोधदर्शनयु क्त्या
येनेत्यर्थः॥उक्तमर्थंदार्ष्टांतिकेयोजयति॥ ॥तथातत्त्वमसीतिवाक्यंतदर्थोवापरोक्षत्वापरो
क्षादिविशिष्टचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यांशेविरोधाद्विरुद्धं परोक्षत्वापरोक्ष
त्वांशंपरित्यज्य॥अविरुद्धमखंडचैतन्यमात्रंलक्षयतीतितथातत्त्वमस्यादिवाक्य ४५
स्यापिपरोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणमुख्यार्थत्रतिपादकत्वासं
भवाज्जहदजहल्लक्षणयाविरुद्धपरोक्षत्वापरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनावि

रुद्धाखंडचैतन्यमात्रप्रतिपादकत्वंतस्येत्यर्थः॥अखंडचैतन्यप्रतिपादकस्यतत्त्वम
सीतिवाक्यस्यार्थसप्तपंचमभिधायेदानीयजुर्वेदाद्यनुभववाक्यार्थोवर्ण्यतइत्याह
॥अधुनाऽहंब्रह्मास्मीत्यनुभववाक्यार्थोवर्ण्यते॥गुरुमुखात्तत्पदत्वंपदार्थयोस्त्वमस्यादि
वाक्यश्रवणाद्दृश्याहंकारांतजडपदार्थसकलदृश्यविलक्षणप्रत्यगात्मनःशुद्धेनप
रमात्मनासहैकत्वबोधानंतरंकश्चिदधिकारीलब्धावसरंसर्वोपाधिविनिर्मुक्त
सच्चिदानंदैकरसमनुभवेनजिज्ञासुराचार्योपदिष्टमहंब्रह्मास्मीतिवाक्यार्थम
नुस्मरन्स्वात्मानंदमनुभवतीत्यर्थः॥तत्प्रकारमेवाह॥एवंरूपादिना॥एवमाचा
र्येणाध्यारोपापवादपुरःसरंतत्त्वंपदार्थौशोधयित्वावाक्येनाखंडार्थेअवबोधिते
अधिकारिणः॥अहंनित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयंब्रह्मास्मीत्य

खंडाकाराकारितावृत्तिरुदेति॥एवंसंस्पेपेणवक्ष्यमाणप्रकारेण अधिकारिण
श्चित्तवृत्तिरुदेतीतिसंबंधः॥कदेत्यपेक्षायामाह॥आचार्येणेति॥आचार्येणविषयेः
संगेनिष्कलचैतन्येब्रह्मशृंगायमानाऽविद्ययाऽहंकारादिशरीरांतमिथ्यापदार्थम
ध्यारोप्यतदपवादपुरःसरंतत्वंपदार्थौशोधयित्वातत्त्वमसीतिवाक्येनजहदजह
त्लक्षणयाविरुद्धांशपरित्यागेनअखंडार्थचैतन्येज्ञातेसतीत्यर्थः॥किंविषयिणीचित्त
वृत्तिरुदेतीत्यसत्संकांनिवारयति॥अहमिति॥अहंप्रत्यगात्मापरंब्रह्मास्मीत्यन्वयः
॥ब्रह्मानित्यत्वसंकांनिराकरोति॥नित्येति॥शुद्धपदेनाविद्यादिदोषराहित्यं॥बुद्धप
देनस्वप्रकाशस्वरूपत्वेनजाड्यादिकंव्यवच्छिद्यते॥मुक्तपदेनसर्वोपाधिराहित्यं॥सत्य
मित्यविनाशिस्वभावत्वं॥परमानंदपदेनवैषयिकमनुष्यानंदादिचतुर्मुखब्रह्मानंद ४६

पर्यंतानांकर्मजन्यत्वेनसांतत्वायत्वेनस्वयिष्णुत्वेनचतुच्छत्वात्तेभ्योविलक्षणंनिरतिश
यानंदस्वरूपत्वंप्रतिपाद्यते॥अनंतपदेनघटादिवत्परिछेदराहित्येनदेशतःकालतो
वस्तुतश्चापरिछिन्नत्वंबोध्यते॥अद्वयमितिनानात्वनिषेधेनैकत्वंबोध्यतइत्यर्थः॥न
नुयथादीपप्रभाआदित्यमंडलंनव्याप्नोति॥नचेहप्रयोजनमस्ति॥तथानित्यशुद्धस्वप्रका
शआत्मानंजडाचित्तवृत्तिःकथंविषयीकृत्योदेतिकिंप्रयोजनंचेत्यांक्याह॥सातुचित्प्र
तिबिंबसहितासतीप्रत्यगभिन्नमज्ञानंपरंब्रह्मविषयीकृत्यतदुताज्ञानमेवबाधते॥सावि
णी त्तवृत्तिःनशुद्धब्रह्मविषयिणीकिंतु॥अज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी॥सा
चचैतन्यप्रतिबिंबसंवलितासतीचैतन्यगतमज्ञानंनिवर्त्तयति॥तस्माच्चैतन्यावरकाज्ञा
ननिवृत्तिरेवप्रयोजनमित्यर्थः॥नन्वधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाखंडचै

त्यन्यदृत्यातदाश्रिताज्ञानेनिवारितेपितत्कार्यस्यसकलचराचरप्रपंचजातस्यप्रत्य
क्षतयाभासमानत्वात्कथमद्वैतसिद्धिरित्याशंक्याकारणाज्ञाननाशेतत्कार्यस
कलप्रपंचनाशाद्द्वैतसिद्धिरित्येतत्सदृष्टांतमाह॥तदाघटकारणंतंतुर्दाहेघट
दाहवत्॥अखिलकारणेऽज्ञानेबाधितेसतितत्कार्यस्याखिलस्यबाधितत्वात्तदं
तर्भूताऽखंडाकाराकारितावृत्तिरपिबाधिताभवति॥ननुअज्ञाननाशेनतत्
कार्यप्रपंचस्यनाशोस्तुतथाप्यखंडाकारचित्तवृत्तेरनिवृत्तेरद्वैतहानिरित्याशं
क्याह॥तदंतर्भूतेति॥अखंडाकारचित्तवृत्तेरपिअज्ञानतत्कार्यांतर्भूतत्वात्त ४७
न्निवृत्यातन्निवृत्तेर्नाद्वैतहानिरित्यर्थः॥तनुतथाप्यखंडाकारवृत्तिप्रतिबिंबितचै
तन्याभासत्वात्कथमद्वैतसिद्धिरित्याशंक्याह॥तत्रप्रतिबिंबितचैतन्यमपियथा

दीपप्रभाआदित्यप्रभावभासनासमर्थासतीतयाभिभूताभवति॥तथात्वंपदका
मानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतयातेनाभिभूतेसत्स्वोपाधिभूताखंडवृत्तेर्बा
धितत्वात्दर्पणाभावेमुखप्रतिबिंबस्यमुखमात्रत्वत्प्रत्यगभिन्नपरब्रह्म मात्रंभवति
वि ॥वृत्तिनिवृत्तौतत्प्रतिबिंबितचैतन्यस्यबिंबावभासनासमर्थत्वाद्वृत्युपाधिबाधेनत
त्प्रतिबिंबचैतन्यमपिचैतन्यमात्रतयाऽवशिष्यते॥दर्पणोपाधिविगमेतस्यप्रतिबिंबि
तमुखाभासस्यबिंबभूतमुखमात्रतावशेषवदित्यर्थः॥अयंभावः॥बोधितस्त्वंपदार्थ
स्याधिकारिणस्तदभिव्यंजितगुरुशास्त्रादिभ्यःतत्त्वमसीत्युपदेशेन॥अहंनित्यशु
द्धबुद्धमुक्तसत्यपरमानंदाद्वयाखंडब्रह्मास्मीतिचित्तवृत्तिरुदयमासादयति॥तदानी
मेवतस्यामभिव्यक्ताखंडचैतन्यबलेननत्वपरिपीडिताज्ञाननाशोभवतितदानींतत्का

र्यस्यसर्वस्यनाशादभिव्यक्तिर्नाक्तिरपिसयमेवकतकरजोवद्दारुमथनजनिताग्नि व
द्दुद्दरस्थदुष्टजलशोषंत्यर्थंपीततप्तजलवत्तन्नष्टाभवति॥तद्दानींतज्जडताभासोपिस्वोपा
धिभूतद्दत्तिनाशात्स्वप्नात्मावभासनासमर्थतयादर्पणविगमेतदुपाधिकस्यस्वाधिष्ठा
नमुखमात्रत्ववद्धिष्ठानमात्रीभवतीतिवेदांतसिद्धांतरद्दस्यमिति॥अत्रतस्यानुभवः॥
लोकाश्चभ्रांतिपरमेमतिमोद्दजन्याःस्वप्नेंद्रजालमरुनीरसमाविचित्राः॥ व्युत्थानकालइ
दनस्फुरलंविशुद्दप्रत्यक्सुखाब्धिपरमामृतचित्तद्दतौ॥१॥मत्तःपरंनखलुविश्वमथापिभा
तिमध्येचपूर्वमपरंनरशृंगतुल्यंमायोल्लसास्वगुरुवाक्यसमुल्लबोधभानुप्रभाविलसति
क्वगतंनजाने॥२॥निरतिशयसुखाब्धिप्रेसेकान्तेपरस्मिन्कथमिदमविवेकादुल्लितंस
र्पफणीवाक्वनुगतमधुनातद्दृश्यिकाद्दास्तुतेर्वापरमविमलबोधेऽगुल्लितेद्दंनजाने॥३॥

॥तदेतत्सर्वंमनसिनिधायोपसंद्दरतिप्रत्यगभिन्नेति॥ननुमनसैवानुद्रष्टव्यंमनसैवेदम
न्तव्यं॥दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः॥बुद्ध्यालोकनसाद्येमिन्नस्तुन्यस्त
मितायदि॥बुद्धियोगमुपाश्रित्यमच्चित्तःसततंभवइत्यादिस्मृतीनां॥यतोवाचो
निवर्त्तंतेअप्राप्यमनसासद्द॥यन्मनसान्मयदेवतद्विद्धिनादंथोऽविद्धिनादधि॥ नमनुते॥
अविज्ञातंविजानतांविज्ञातमविजानतां॥अनाश्रिनोपमेयस्य॥यद्विज्ञातंतेया
विन्नयन्नविज्ञातमात्मना॥तांभ्यामन्यत्परंविद्धि॥यद्वैतंवस्तुतद्ब्रह्मेत्यादिश्रुति
स्मृतीनांचपरस्परविरोधमाशंक्यपरिद्दरति॥एवंचसतिमैसैवानुद्रष्टव्यं॥यन्मनसान म
मनुतइत्यनयोरविरोधः॥एवमुक्तप्रकारेण॥अज्ञानचैतन्यस्यद्दत्तिव्याप्यत्वांगीकारेणफ
लव्याप्यत्वेनतिषिद्धेसतीत्यर्थः॥तदेवाद्ह॥द्दत्तिव्याप्यत्वांगीकारेणफलव्याप्यत्वप्रतिषेधप्र

त्तिपदनाम्॥अंतःकरणवृत्तेरावरणनिरस्यर्थमज्ञानावच्छिन्नंचैतन्यंव्याप्नोतीत्येतद्वृत्ति
व्याप्त्वमंगीक्रियते॥आवरणभंगानंतरंस्वयंप्रकाशमानंचैतन्यंफलचैतन्यमित्युच्य
ते॥तस्मिन्फलचैतन्येनिःकलंकेचिन्नवृत्तिर्नव्याप्नोति॥आवरणभंगस्यप्रागेवजा त
त्वेनप्रयोजनाभावादित्यर्थः॥अस्मिन्नर्थेग्रंथांतरंसंवादयति॥तदुक्तं॥फलव्याप्त्व
त्वमेवास्यशास्त्रदृष्टिर्निवारितं॥ब्रह्मण्यज्ञाननाशायवृत्तिर्व्याप्तिरपेक्षितेति॥वृत्ति प्र
तिबिंबितचैतन्याभासस्यापिफलचैतन्यत्रकाशकत्वेनेत्यत्रापिसंमतिमाह॥स्वयं
प्रकाशमानसाक्षाभासउपयुज्यतइतिचतेंऽपदार्थीकाराकारितचित्तवृत्तेर्विशे
षोस्ति॥इदानींजडपदार्थविषयिकचित्तवृत्तेर्ब्रह्माकारवृत्त्यपेक्षयावैलक्षण्यंदर्श
यितुमाह॥जडपदार्थेति॥अहंब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारवृत्तिस्तदावर

कमज्ञानमात्रंनिवर्त्तयति॥ब्रह्मतुस्वप्रकाशात्मत्वात्स्वयमेवप्रकाशते॥नतुवृत्तिप्रति
बिंबितचिदाभासेनचैतन्यंप्रकाश्यते॥नचतत्सामर्थ्यात्॥अयंघटइतिघटाकारा
वकारितचित्तवृत्तिस्तुघटावच्छिन्नचैतन्यावरकाज्ञानंनिवर्त्यस्वप्रतिबिंबितचिदाभासेन
जडंघटमपिप्रकाशयति॥अतस्तयोर्विशेषोऽस्तीत्येतदेवप्रपंचयितुंप्रतिजानीते
तथाहीति॥अयंघटइतिघटाकाराकारितचित्तवृत्तिरज्ञातंघटंविषयीकृत्यतद्गता
ज्ञाननिरसनसमर्थःस्वगतचिदाभासेनजडंघटमपिभासयति॥जडपदार्थवि
षयिणीचित्तवृत्तिमभिनीयदर्शयति॥अयमिति॥वृत्तिसंबंधात्प्राक्घटस्याज्ञातत्वा
दज्ञानंघटंविषयीकृत्यप्रवृत्तोचित्तवृत्तिर्घटगताज्ञानंहरीकुर्वाणाचिदाभासेन
घटमपिभासयतीत्यर्थः॥अस्मिन्नर्थेवृद्धसंमतिमाह॥तदुक्तं॥बुद्धितत्स्थचिदाभा

वेदांती
४९

सोहावपिव्याप्तोघटं॥तत्राज्ञानंधियानश्येदाभासेनघटःस्फुरेत्॥बुद्धिश्चतत्रबुद्धौघटि
बिंबितचिदाभासश्चबुद्धितत्स्थचिदाभासौहावेतौबुद्धिचिदाभासौघटंव्याप्नुतः॥तत्रत
योर्मध्येधियावृत्त्याघटाज्ञानंनश्येत्चिदाभासेतुघटःस्फुरेदित्यर्थः॥अत्रानुरूपंदृष्टांत
माह॥यथादीपप्रभामंडलमंधकारगतंघटपटादिकंविषयीकृत्यतज्जतांधकारनिर
सनपुनःसरंस्वप्रभयातद्पिभासयतीति॥यथाअंधकारावस्थितंघटादिकंविष
यीकृत्यप्रवर्त्तमानंदीपप्रभामंडलंघटावरकांधकारनिवृत्तिद्वारास्वप्रभयाघटादि
कंप्रकाशयतितद्वदित्यर्थः॥इयताग्रंथजालेनघटितपदार्थस्यप्रत्यगभिन्नपरमानंदा
खंडचैतन्यस्यसाक्षात्कारलक्षणामखंडाकारांतःकरणवृत्तिंघटितपदार्थितुंतत्साधन
भूतश्रवणादेरवश्यानुष्ठेयत्वं॥तेषांलक्षणानिचक्रमेणदर्शयति॥एवंभूतेत्यादिनाऽद्वै

तंवस्तुभासतइत्यंतेन॥एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यंतंश्रवणमनननिद्धि
ध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपिमदर्श्यंते॥श्रवणंनामषड्विधलिंगैरद्वैषवे
दांतानामद्वितीयवस्तुनितात्पर्यावधारणं।लिंगानितु॥उपक्रमोपसंहाराभ्यासाः
पूर्वताफलार्थवादोपपत्त्याख्यानि॥प्रकरणप्रतिपाद्यस्यार्थस्यतद्वाचंनयोरुपपाद
नंउपक्रमोपसंहारौ॥यथाछांदोग्येषष्ठाध्यायेप्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन
एकमेवाद्वितीयंइत्यादौएतदात्म्यमिदमित्यंतेचप्रतिपादनं॥प्रकरणप्रतिपाद्यस्यत
न्मध्येपौनःपुन्येनप्रतिपादनमभ्यासः॥यथातत्रैवाद्वितीयवस्तुनोमध्येतत्त्वमसीति
नवकृत्वःप्रतिपादनं॥प्रकरणाप्रतिपाद्यस्याद्वितीयवस्तुनःप्रमाणांतराविषयी
करणंअपूर्वता॥यथातत्रैवाद्वितीयवस्तुनोमानांतराविषयीकरणं।फलंतुप्रकरण

प्रतिपाद्यस्यात्मज्ञानस्य [illegible]नुष्ठानस्यवातत्रतत्रश्रूयमाणंप्रयोजनं॥यथातत्रैवाचार्यवा
न्यत्रुरुषोवेद॥तस्यावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्यइत्यहिंतीयवस्तुज्ञानस्यत
त्प्राप्तिःप्रयोजनंश्रूयते॥प्रकरणप्रतिपाद्यस्यतत्रतत्रप्रशंसनमर्थवादः॥यथातत्रैव
तमादेतमात्मानंविदित्वाब्राह्मणोयेनास्रुतंश्रुतंभवति॥अमतंमतमविज्ञातंविज्ञातमित्यहिंतीयव
स्तुप्रशंसनं॥प्रकरणप्रतिपाद्यार्थसाधनेतत्रश्रूयमाणायुक्तिरुपपत्तिः॥तत्रयथासो
म्यैकेनमृत्पिंडेनसर्वंमन्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवस
त्यमित्यादावहिंतीयवस्तुसाधनेविकारस्यवाचारंभणमात्रत्वेयुक्तिःश्रूयते॥मननंतु ५१
श्रुतस्याऽहितीयवस्तुनोवेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं॥विजातीयदेहादि
प्रत्ययरहितोऽहितीयवस्तुसजातीयप्रवाहोनिदिध्यासनं॥समाधिर्द्विविधः॥सविक

ल्पकोनिर्विकल्पकश्चेति॥तत्रसविकल्पकोनाम॥ज्ञातृज्ञानादिविकल्पलयाऽनपेक्षयाऽहि
तीयवस्तुनितद्याकाराकारितायाश्चित्तवृत्तेरवस्थानं॥तदामृन्मयगजादिभानेऽपि
मृज्ज्ञानवत्तद्वैतभानेऽप्यद्वैतंवस्तुभासते॥एवंभूतस्यैकश्रुतियुक्त्यनुभवैर्निरस्त
समस्तोपाधिप्रत्यगभिन्नपरमानंदचिद्रूपस्यसाक्षात्कारपर्यंतंश्रवणादीन्यनुष्ठेयानी
तिप्रतिजानीतेतेपीति॥श्रवणादयोऽपीत्यर्थः॥तत्रश्रवणस्यलक्षणमाह॥षड्विधे
ति॥लीनमर्थंगमयतीतिलिंगंशास्त्रस्युत्पत्तेर्ब्रह्मात्मैकत्वनिश्चायकैरुपक्रमोपसंहा
रादिषड्विधलिंगैःसर्वेषांवेदांतवाक्यानांअद्वितीयेब्रह्मणितात्पर्यनिश्चयःश्रवणमि
त्यर्थः॥तानिचलिंगानिक्रमेणोपदिशति॥उपक्रमेति॥तथाचोक्तं॥उपक्रमोपसंहारावभ्या
सोऽपूर्वताफलं॥अर्थवादोपपत्तिश्चलिंगंतात्पर्यनिर्णयइति॥उपक्रमोपसंहारौतावे

दर्शयति॥प्रकरणप्रतिपाद्यमेति॥तदुदाहृत्यदर्शयति॥यथेति॥एकमेवाद्वितीयमित्युप
क्रम्यैतदात्म्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहाराविति यर्थः॥अभ्यासस्यलक्षण
माह॥पौनःपुन्येनेति॥अत्रापिश्रुतिमुदाहरति॥यथेति॥अपूर्वत्वस्यलक्षणमाह॥प्रमा
णांतरेति॥तंतौपनिषदंपुरुषंपृच्छामीत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपा द
नाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः॥अथवाब्रह्मणः स्वप्रकाशत्वेनस्वव्यवहारायस्वातिरिक्तप्र
माणाऽनपेक्षत्वात्तद्ब्रह्मणोऽपूर्वत्वमित्यर्थः॥क्रमप्राप्तस्यफलस्यलक्षणमाह॥फलंचेति॥
अत्रानुरूपमुदाहरणमाह॥आचार्यवान्पुरुषोवेदेत्यादि॥श्रवणादिसाधनानांब्रह्मा
त्मैकत्वविज्ञानंप्रयोजनं॥ब्रह्मज्ञानस्यतुतत्प्राप्तिफलं॥ब्रह्मविद्ब्रह्मैवभवति॥तर
तिशोकमात्मविदित्यादिश्रुतेरित्यर्थः॥पंचमस्यार्थवादस्यलक्षणमाह॥प्रशंसनंइ

५२

ति॥प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावकवाक्यमर्थवादइत्यर्थः॥अत्रापिश्रुति
माह॥उतततमादेशोत्यादियेनाश्रुतंश्रुतंभवति॥येनसकलप्रपंचाधिष्ठानब्रह्मस्व
रूपश्रवणेनाश्रुतंप्रपंचजातमपिश्रुतंभवति॥येनब्रह्मज्ञानेनाज्ञातंसर्वंजगदज्ञा
तंभवति॥येनब्रह्मसाक्षात्कारेणःसाक्षात्कृतंसाक्षात्कृतंभवति॥ब्रह्मणःसर्व
तःसंप्लुतोदकस्थानीयत्वादित्यर्थः॥अवस्थितेरुपपत्तेर्लक्षणमाह॥युक्तिरिति॥
तामुदाहरति॥यथातत्रसौम्येति॥मृद्विकारेषुघटादिषुविकारनामधेययोर्वाचा
रंभणमात्रत्वेनयथामृत्त्वमेवावस्थितेनान्यत्॥तथाविद्विवर्त्तस्यप्रपंचस्यजि
रिनदीसमुद्रात्मकविकारनामधेययोर्वाचारंभणमात्रत्वात्चिन्मात्रत्वमेवावस्थिष्य
ते॥रज्जुविवर्त्तस्यसर्पस्यरज्जुमात्रावस्थेवदित्यर्थः॥श्रवणनिरूपणानंतरंतदु

त्तरांगस्यमननस्यलक्षणमाहमननंत्रिति॥षड्विधलिंगतात्पर्यपूर्वकंश्रुतस्याद्वितीय
ब्रह्मणोवेदांताविरोधिनाभिर्युक्तिभिर्नैरंतर्येणानुचिंतनंमननमित्यर्थः॥निदिध्या
सनलक्षणमाह॥विजातीयेति॥विजातीयदेहादिबुद्धिंनजडपदार्थनिराकर
णेनसजातीयाद्वितीयवस्तुविषयप्रत्ययप्रवाहीकरणंनिदिध्यासनमित्यर्थः॥
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावसतिचित्तस्यैकाग्रतापरिणामःसमा
धिः॥सचद्विविधइत्याह॥सविकल्पकोनिर्विकल्पकश्रुतस्यलक्षणमाहतत्त्वेति॥ ५३
तत्रतयोःसविकल्पकनिर्विकल्पकयोर्मध्येसविकल्पकोपिद्विविधः॥अहंब्रह्मा
स्मीतिज्ञातृविद्वतयाऽद्वितीयवस्तुनिचित्तवृत्तेरवस्थानमित्येकः॥द्वितीयस्तु
ज्ञातृज्ञानज्ञेयत्रिपुटिविलयानपेक्षयाऽहंब्रह्मास्मीतिज्ञानानुविद्वतयाऽद्वितीय
वस्त्वनविच्छेदेनचित्तवृत्तेरवस्थानमित्यर्थः॥ननुभक्तेपिलक्षणेनज्ञांतोव्याधिरि
तिन्यायेनोक्तसविकल्पकसमाध्योःसकलभेदनिराकरणायप्रवर्त्तनात्तयोरपिज्ञात्रा
दिभेदविषयत्वेननाद्वैतवस्तुमात्रभानंतत्रेत्याद्याशंक्योत्तरमाह॥तदेति॥तदास
विकल्पकसमाध्यनुभवकालेज्ञात्रादिभेदप्रतीतावप्यद्वैतंवस्तुभासतएव॥सुव
र्णमयकुंडलादिभानेसुवर्णभानवन्मृन्मयगजादिभानेमृद्भानवच्चगजादिभा
नस्यवाचारंभणमात्रत्ववत्तज्ज्ञात्रादिभानस्यापिवाचारंभणमात्रत्वादद्वैतमेव
वस्त्वभासतइत्यर्थः॥यद्वा॥सर्वंखल्विदंब्रह्मतदात्म्यमिदंसर्वमित्याद्यश्रु
तिबलात्सर्वमदमितिगिरिनदीसमुद्रात्मकंसर्वंजगत्साभिन्नसच्चिदानंदब्र
ह्मत्वेनानुभूयतस्यदग्धपटन्यायेनप्रपंचभानेऽप्यद्वैतंसच्चिदानंदलक्षणंवस्तु

भासतेएवेत्यर्थः॥तदुक्तंभगवता॥वासुदेवःसर्वमितिसमहात्मासुदुर्लभइति॥मू
लकारोप्यस्मिन्नर्थेग्रंथांतरसंमतिंदर्शयति॥तदुक्तं॥दृग्निस्वरूपंगगनोपमंपरं
सकृद्विभातंह्यजमेकमक्षरं॥अलेपकंसर्वगतंयदद्वयंतदेवचाहंसततंवि
मुक्तः॥ॐमितियत्परंब्रह्मतदेवाहमित्यन्वयःकिंतदित्याह॥दृग्निस्वरूपमिति
॥दृग्निर्दृष्टिस्तस्याःस्वेपंद्रष्टृत्वंतद्यस्यपरमात्मस्वरूपस्यतद्दृग्निस्वरूपं साक्षिस्वरू
पमित्यर्थः॥तदुक्तंभगवता॥उपद्रष्टानुमंताचभर्त्ताभोक्तामहेश्वरः॥परमात्मे
तिचाप्युक्तोदेहेस्मिन्पुरुषःपरइति॥१॥पुनःकिंरूपंतत्॥गगनोपमं॥गगनंउ
पमादृष्टांतोयस्यतत्तद्गगनोपमं॥गगनवन्निर्लेपस्वरूपमित्यर्थः॥तथाचभग
वद्वचनं॥यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यतेसर्वत्रावस्थितोदेहेतथात्मा

नोपलिप्यतेइति॥२॥यद्वा॥गगनोपमंगगनवदमूर्त्तस्वरूपमित्यर्थः॥आकाशश
रीरंब्रह्मेतिश्रुतेः॥पुनःकिंभूतं॥सकृद्विभातं॥सकृदेकदैवविभातंसर्वदैकस्वरू
णभासमानं॥चंद्रादिप्रकाशवन्नदृद्दिक्षयशीलमित्यर्थः॥पुनःकिंभूतंअज
जन्मरहितंएकंनिरस्तसर्वोपाधिभेदं॥अक्षरंविनाशधर्मराहित्येनकूटस्थ
स्वरूपमित्यर्थः॥तथाचभगवान्आहक्षरःसर्वाणिभूतानिकूटस्थोक्षरउ
च्यतेइति॥अलेपकंअसंगत्वादविद्यादिदोषरहितमित्यर्थः॥असंगोह्ययंपुरु
षइतिश्रुतेः॥सर्वगतंसर्वत्रब्रह्मादिस्थावरांतेषुभूतेषुगतंव्याप्तं॥अद्वयंसजा
तीयविजातीयस्वगतभेदराहित्येनद्वितीयरहितं॥सततंविमुक्तमिति॥सर्वदा
कार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेनसततैकरूपमित्यर्थः॥तथाचभागवते

॥षड्हीमुक्तइतिव्याख्यागुणतोमेवनवस्तुतइति॥तथाच॥एतादृशंनिरतिशयानंदं
यत्परंब्रह्मतदेवाहमितिभावयतोनिषेधप्रतियोगित्वेनतत्तदुपाधित्वेनतत्तदुपा
धिभानात्तत्प्रयुक्तभेदभानेप्यद्वैतंभासतएवेत्यर्थः॥निर्विकल्पकसमाधिस्तरू
पमाह॥निर्विकल्पकस्तुज्ञातृज्ञानादिविकल्पशून्यापेक्षयाअद्वितीयवस्तुनित
दाकारोकारितायाःचित्तवृत्तेरतिरामेकीभावेनावस्थानं॥तदातुजलाकारा
कारितालवणानवभासेनजलमात्रावभासवत्अद्वितीयवस्त्वाकाराकारितचित्त
वृत्यनवभासेनाद्वितीयवस्तुमात्रमवभासते॥ततश्चास्यसुषुप्तेश्चाभेदभ्रांकापि ५५
नभवति॥उभयत्रवृत्त्यभानेसमानेपितत्सद्भावासद्भावमात्रेणतयोर्भेदोपपत्तेः
॥अयंचद्विविधः॥चिरकालाभ्यस्ततद्दुस्तरसविकल्पकसमाध्यनुभवजनितसंस्का

रसहकृतायाश्चित्तवृत्तेर्नीलादित्रिपुटीलयपूर्वकमद्वैतेवस्तून्येकलोलीभावेना
वस्थानात्मकःप्रथमः॥एतन्निर्विकल्पकसमाध्यभ्यासपाटवेनलुप्तसंस्कारतयाज्ञा
द्रित्रिपुटीलयपूर्वकमखंडाकाराकारितायाःचित्तवृत्तेर्विनापिस्वस्फूर्तिकेवलचिदा
नंदात्मनावस्थानात्मकोद्वितीयः॥तत्रद्वितीयंपक्षमभिप्रेत्याहज्ञानादीति॥नन्वे ज्ञात
वंसमाधिसुषुप्त्योर्विक्षेपाभावेनवृत्त्यभानादभेदंआशंक्यपरिहरति॥ततश्चे
ति॥तत्रयुक्तिमाह॥उभयत्रेतिसमाधिसुषुप्त्योरित्यर्थः॥तत्सद्भावेपिसमाधाव
ज्ञायमानवृत्तिसद्भावात्सुषुप्तौवृत्त्यभावाच्चतयोर्नभेदोपपत्तेरित्यर्थः॥उक्तसमा
धेःसाधनापेक्षायामाह॥अस्यांगानि॥यमनियमासनप्राणायामप्रत्याहारधार
णाध्यानसमाधयः॥तानिचसाधनानिक्रमेणोपदिशतियमइति॥यमाद्यष्टांगा

निसमाधेरंतरंगसाधनानीत्यर्थः॥अथमंयमस्यलक्षणमाह॥तत्राहिंसासत्यास्ते
यब्रह्मचर्यापरिग्रहायमाः॥तेषुयमाद्यष्टांगेषुमध्येअहिंसादयःपंचयमाअवश्या
नुष्ठेयाइत्यर्थः॥तदनेतरंनियमानाह॥शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधाना
निनियमाः॥शौचादयःपंचनियमाइत्यर्थः॥आसनंलक्षयति॥करचरणादिसं
स्थानविन्यासलक्षणानिपद्मकस्वस्तिकादीन्यासनानि॥प्राणायामलक्षणमाह॥
रेचकपूरककुंभकलक्षणाःप्राणनिग्रहोपायाःप्राणायामाःइडयापूरयेद्वायुं
मुंचेत्पिंगलयानिलं॥यावत्श्वासंसमासीनःकुंभयेत्तंसुषुम्णया॥यदायोगीपद्मा
द्यासनेउपविश्ययोगमभ्यसति॥तदागुल्फाभ्यांगुदमूलंनिःपीड्यखेचरीमुद्रास
हायेनप्राणधारणसुषुम्णामार्गेणमूलाधारात्कुंडलिनीमुत्थाप्यस्वाधिष्ठानमणिपू ५६

रानाहतविशुद्धाज्ञानिर्वाणाख्यषट्चक्रभेदक्रमेणसहस्रदलकमलकर्णिकायांवि
द्यमानपरमात्मनासहसंयोज्यतत्रैवचित्तंनिर्वातदीपवदचलंकृत्वास्वात्मनंदरसं
पिबतीत्येतत्प्राणायामफलं॥सचहिविधः॥अगर्भःसगर्भश्चेति॥मुंचेद्दक्षिणया
वायुंमात्राहीनमनन्यधीःपूरयेद्वामयातद्वत्कुंभयेच्चसुषुम्णया॥यावत्श्वासं
जितश्वासोभवेन्मासाद्भितेंद्रियइति॥प्रणवोच्चारणादित्येनउक्तरेचकपूरक
कुंभकक्रमेणप्राणनिरोधोःगर्भःप्राणायामः॥रेचयेत्योउन्योनैवतद्वैगुण्येनपूर
येत्॥कुंभयेच्चचतुःषष्ट्याप्रणवार्थमनुस्मरन्॥१॥इतिवचनात्॥षोडशसंख्याकं
प्रणवंमनसाजपन्दक्षिणयावायुंविरेचयेत्द्वात्रिंशत्संख्याकंप्रणवंमनसासमुच्च
रन्वामयावायुंआपूर्यचतुःषष्टिसंख्याकंप्रणवंमनसाजपन्तदर्थंचभकारउ

कारमकाराईमात्रात्मकसार्द्धत्रिवलयाकारकुंडलिनीरूपंचिदानंदकंदंचमूलादिब्र
ह्मरंध्रांतमनुसंदधत्सुषुम्णयाचिन्नमपितदकपवणंकुर्वन्यावत्श्वासंकुंभयेत्त
दुक्तमाचार्यैः॥षोडशातद्विगुणचतुःषष्टिमात्राणिचतानिचक्रमशः॥रेचकपूरक
कुंभकभेदैस्त्रिविधप्रभंजनायामइतिप्राणायामप्रकारः॥क्रमशस्तेप्रत्याहारंनिरू
पयति॥इंद्रियाणांस्वस्वविषयेभ्यःप्रत्याहरणंप्रत्याहारः॥श्रोत्रादीनामिंद्रियाणांस्व
स्वविषयेभ्यःशब्दादिभ्यःसकाशात्पराणोपरियुक्तःशरसंघातस्तद्वत्प्रत्यावर्त्तनं
प्रत्याहारः॥नन्विंद्रियाणांस्वस्वविषयेभ्योनिवर्त्तनंप्रत्याहारइत्युक्तंतन्नसंभवति॥
शब्दादिविषयाणांसुखसाधनत्वेनवैषयिकसुखव्यतिरिक्तनित्यनिरतिशयानंदस
द्भावेप्रमाणाभावात्॥हैरण्यगर्भाद्यमृतभोगस्येश्वरेणापित्यक्तुमशक्यत्वादितिचेत्॥

न॥मूढैःकर्मजडैर्विषयलंपटैस्त्यक्तुमशक्यत्वेपिशुद्धांतःकरणेनसंसारोऽविद्यकत्व
दर्शनात्विषयदोषदर्शनेननुच्छीकृतशब्दादिविषयपंचेनपुरुषोत्तमेनपुरी
षवत्त्यक्तुंशक्यत्वात्॥अन्यथासंन्यासएवलोलुपेनतस्मात्न्यासमेतेषांतपसा
मतिरिक्तमाहुः॥एतमेवलोकमीप्संतःप्रव्राजिनःप्रव्रजंति॥एतत्सर्वंभूःस्वाहा
इत्यसुपरित्यज्यआत्मानमन्विछेत्॥त्यागेनैकेअमृतत्वमानशुःप्रव्रज्यचर्यादृ
वप्रव्रजेत्॥यदहरेवविरजेत्तदहरेवप्रव्रजेत्वनादृहाहा॥सर्वधर्मान्परि
त्यज्यमामेकंशरणंव्रजेति॥संसारमेवनिःसारंदृष्ट्वासारदिदृक्षया॥प्रव्रजंत्य
कृतोह्याद्याःपरंवैराग्यमाश्रिताः॥प्रत्यग्विविदिषासिद्धेवेदानुवचनादयः॥
ब्रह्मावाश्यैतुत्यागमीप्संतीतिश्रुतेर्बलात्इत्यादिश्रुतिस्मृतिभ्यःतथाआनंदा

ब्रह्मेतिव्यजानात्॥एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतिइति॥एषोस्य
परमानंदः॥आत्मैवानंदः॥यदेषआकाशआनंदोनस्यात्॥आनंदाध्येवखल्वित्यादि
श्रुतिभिश्चनित्यात्मसुखस्यप्रतिपादितत्वात्॥नह्यादिवैषयिकसुखव्यतिरिक्त
नित्यनिरतिशयानंदसद्भावेप्रमाणाभावादित्येतदपिनिरस्तंबोध्यं॥संप्रति धा
रणांलक्षयति॥अद्वितीयवस्तुन्यंतरिंद्रियवृत्तिधारणंधारणा॥सर्वेषांबुद्धिसा
क्षितयाविद्यमानेवस्तुनिचित्तनिक्षेपणंधारणेत्यर्थः॥धारणापारवाऽभावेनचित्त ५८
स्थैर्याभावात्॥अद्वितीयवस्तुनिविछिद्यविछिद्यचित्तवृत्तिप्रवाहीकरणंध्यानमि
त्याह॥तत्राद्वितीयवस्तुनिविछिद्यविछिद्यांतरिंद्रियप्रवाहोध्याने॥समाधिरुक्त
एवसविकल्पकःस्मर्तव्यइत्याह॥समाधिस्तूक्तःसविकल्पकएवउक्तयमाद्यष्टांगस

हितनिर्विकल्पकसमाधेर्निर्विघ्नानुष्ठानसिध्यर्थंविघ्नज्ञानव्यतिरेकेणतन्निवारणस्यकर्तु
मशक्यत्वात्॥अस्यचतुरोविघ्नान्संदर्शयति॥एवमस्यांगिनोनिर्विकल्पकस्यलयविक्षे
पकषायरसास्वादलक्षणाश्चत्वारोविघ्नाःसंभवंति॥तत्राद्यंविघ्नंलक्षयतिलयस्तावत्॥
लयोद्विविधःचिरकालमुक्ताष्टांगसहितनिर्विकल्पकसविकल्पकसमाध्यभ्यासपा
टवेनातितप्तलोहतप्तक्षिप्तजलबिंदुवत्तैलरहितदीपकलिकावच्चप्रत्यगभिन्नेपर
मानंदेचित्तवृत्तेर्लयःप्रथमः॥द्वितीयस्तुमूर्छावस्थावत्आलस्येनचित्तवृत्तेःबाह्यग्राह्य
द्विषयग्रहानादरेसतिप्रत्यगात्मस्वरूपानवभासनात्तूष्णीभावलक्षणनिद्रारूपः॥
तत्राद्यमंगीकृत्यद्वितीयस्यविघ्नत्वेनतस्यागायनत्वरूपमाह॥अखंडवस्त्वनवलंबनेनचि
त्तवृत्तेःनिद्रा॥द्वितीयंविघ्नमाह॥अखंडवस्त्वनवलंबनेनचित्तवृत्तेरन्यावलंबनंविक्षे

पः॥अखंडवस्तुग्रहणायांतर्मुखतयाप्रवृत्तायाश्चित्तवृत्तेश्चिदनवलंबनेनत्रस्तपक्षिवत्पु
नर्बाह्यविषयग्रहणायप्रवृत्तिर्विक्षेपइत्यर्थः॥तृतीयंविघ्नमाह॥लयविक्षेपाभावेपिचित्त
वृत्तेःरागादिवासनयास्तब्धीभावादखंडवस्त्वनवलंबनंकषायः॥रागादयःत्रिविधाः॥वा
स्याः॥आभ्यंतराः॥वासनामात्ररूपाश्चेति॥वास्याः॥पुत्रादिविषयाः॥आभ्यंतरामनोराज्या
दयः॥संस्काररूपावासनामयाः॥तत्रानेकजन्माभ्यस्तवास्याभ्यंतररागाद्यनुभवज
नितसंस्कारैःकलुषीकृतंचित्तंकथंचित्श्रवणादिसाधनेनांतर्मुखमपिचैतन्यग्रहण
सामर्थ्याभावान्मध्यएवस्तब्धीभवति॥यथाराजदर्शनायस्वगृहान्निर्गत्यराजमंदिरंप
विष्टस्यकस्यचित्पुरुषस्यद्वारपालनिरोधेनस्तब्धीभावः॥तथापरित्यक्तबाह्यविषय ५९
स्यापिअखंडवस्तुग्रहणायप्रवृत्तस्योद्भूतरागादिसंस्कारेस्तब्धीभावादखंडवस्तुग्रह रामः

णंकषायइत्यर्थः॥चतुर्थंविघ्नमाह॥अखंडवस्त्वनवलंबनेनापिचित्तवृत्तेःसविकल्पकानंदा
स्वादनंरसास्वादः॥उक्तसविकल्पकसमाधेर्मध्येद्वितीयोन्नह्याननुविद्धस्त्रिपुटीविशि
ष्टः॥तस्मिन्नयमानंदोबाह्यज्ञाद्विषयप्रपंचभारत्यागप्रयुक्तोननुचैतन्यप्रयुक्तः॥
यथानिधिग्रहणायप्रवृत्तस्यनिधिपरिपालकभूतसर्पेणाद्यावृतस्यनिधिप्राप्त्यभावेपि
भूताद्यनिष्टनिवृत्तिमात्रेणकोपिमहानानंदोभवति॥तथासविकल्पकसमाधावखंड
वस्त्वनवलंबनेननित्यानंदरसास्वादनाभावेपिअनिष्टबाह्यप्रपंचनिवृत्तिजन्यानं
दंसविकल्पकरूपंब्रह्मानंदांशेणास्वादयतितद्रसास्वादनमित्यर्थः॥लक्षणांतरमा
ह॥समाध्यारंभसमयेसविकल्पकानंदास्वादनंवानिर्विकल्पसमाध्यारंभकालेअनुभूय
मानसविकल्पकानंदत्यागसहिष्णुतयापुनस्तस्यैवास्वादनंरसास्वादइत्यर्थः॥द्वौक्त्वि

अचतुष्टयनिवृत्तेःफलमाह॥अनेनविघ्नचतुष्टयेनविरहितंचित्तंनिर्वातदीपवदचलं सदखंडचैतन्यमात्रमवतिष्ठतेयदा॥तदानिर्विकल्पकसमाधिरुच्यते॥लयादिवि घ्नाभावसहितंचित्तंयदानिर्वातदीपवदचलमखंडचैतन्यमात्रमवतिष्ठतेतदानि र्विकल्पकसमाधिरित्यर्थः॥लयादिविघ्नसद्भावेतन्निवृत्तिप्रकारेचद्वेहेसंमति माह॥तदुक्तं॥लयसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः॥सकषायंविजानीयात्समप्राप्तं नचालयेत्॥नास्वादयेत्सुखंतत्रनिःसंगःप्रज्ञयाभवेत्॥इतिपूर्वोक्तनिद्रालक्षणेलये जातेसतितन्निवृत्त्यर्थंचित्तंसंबोधयेत्तत्रचित्तगतजाड्यादिपरित्यागेनचित्तमुद्बोधये त्॥उक्तविक्षेपयुक्तंचित्तंयदाभवतितदाविषयवैराग्यादिनाचित्तंशमयेत्॥वहि र्मुखतांपरित्यज्यांतर्मुखंकुर्यात्॥उक्तरागादिकषायसहितंचित्तंयदाभवेत्तदा

विजानीयात्॥इयंरागादिवासनाबाह्यविषयप्रापिकानत्वखंडवस्तुप्रापिका॥अतोने यंसमीचीनेतिविचिंत्यप्रत्यक्प्रवणवासनायाःसकाशादियंनिकृष्यतस्याज्ञे यमितिजानीयादित्यर्थः॥यद्वा॥सम्यक्वस्तुन्यग्रंचित्तंयदाभवति॥तदातच्चि त्तंकषायसहितंजानीयात्॥तच्चित्तंयावताकालेनरागादिवासनाक्षयसहितं भवति॥तावत्कालंतच्चित्तंस्वस्थानात्नचालयेन्नकंपयेत्॥वासनाक्षयानं तरंचित्तंस्वतएवप्रत्यक्प्रवणंभवतीत्यर्थः॥नास्वादयेदितिपूर्वोक्तंसविकल्प करसंविषयप्रपंचभारत्यागजन्यंनास्वादयेत्नानुभावयेत्तत्रयुक्तिमाह॥ निःसंगइति॥यतोनिःसंगोवैषयिकसुखदुःखादिसंगरहितः॥अतःप्रज्ञयायु क्तोभवेत्स्थिरप्रज्ञोभवेदित्यर्थः॥तदुक्तंभगवता॥प्रजहातियदाकामान्सर्वा

नृपार्थमनोगतान्॥आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यतेइति॥तस्मात्सत्त्व
द्विविघ्नाभावविशिष्टचित्तस्यचिन्मात्रतयावस्थानंनिर्विकल्पसमाधिरित्यर्थः॥त
त्रभगवानाह॥यथादीपोनिवातस्थोनेंगतेसोपमास्मृतेति॥अथनिर्विकल्पकस
माधौस्वगुरूपदिष्टमार्गेणयथामतिकिंचिद्विचार्यते॥पंचभूमिकोपेतस्यचित्त
स्यभूमिकात्रयपरित्यागेनअवशिष्टभूमिकाद्वयंसमाधिरित्युच्यते॥काःताःपं
चभूमिकाः॥क्षिप्तंमूढंविक्षिप्तमेकाग्रेनिरुद्धंचेतिपंचचित्तभूमिकाः॥तत्रासु
रसंपत्तेःकर्मशास्त्रदेहवासनासुवर्तमानंचित्तंक्षिप्तमित्युच्यते॥निद्रातंद्रादिग्र ६१
स्तंचित्तंमूढमित्युच्यते॥कदाचित्कध्यानयुक्तंबहिर्गमनशीलमपिउत्क्षि
प्तात्विशिष्टतयाचित्तंविक्षिप्तमित्युच्यते॥तत्रक्षिप्तमूढयोःसमाधित्वंकैवना

क्षिविक्षिप्ते तुचेनसिविक्षेपांतर्गततयादृष्टांतर्गतबीजवच्चित्तस्यसद्भावे
नाज्ञातत्वतदापिनसमाधिः॥एकाग्रतांपतंजलिःसूत्रयति॥क्षीणोदितौतुल्यप्र
त्ययौचित्तस्यैकाग्रतापरिणामइति॥अस्यार्थः॥क्षीणोअतीतः॥उदितोवर्त्तमानः
॥प्रत्ययःचित्तवृत्तिः॥अतीतप्रत्ययोयंपदार्थंपरिगृह्णाति॥उदितोपितमेवचे
त्तृह्रीयात्तदातावुभौतुल्यप्रत्ययौभवतः॥तादृक्षएवचित्तस्यपरिणामएका
ग्रतेत्युच्यते॥एकाग्रताभिधहिलक्षणंसमाधिंसूत्रयति॥सर्वार्थैकाग्रतयोःक्ष
योदयौचित्तस्यपरिणामःसमाधिरिति॥रजोगुणेनचास्यमानंचित्तंक्रमेणसर्वान्य
दार्थान्परिगृह्णाति॥तस्यरजोगुणस्यनिरोधायक्रियमाणेनप्रयत्नविशेषेण
द्विनेष्टिनेयोगिनःसर्वार्थाअतिक्षीयंते॥एकाग्रताचोदेति॥तादृक्षिचित्तस्यप

रिणामःसमाधिरिंसाद्दिभ्योनिषेधेभ्योयोगिनंकर्मभ्योयमयंतिनिवर्त्तयंतीत्यहिंसाद
योयमाःजन्मकृतहेतून्काम्यधर्मान्निवर्त्यमोक्षहेतौनिःकामधर्मेनियमयंतिप्रे
रयंतीतिशौचादयोनियमाः॥यमनियमयोरनुष्ठानवैलक्षण्यंस्मर्यते॥यमान्सेवे
तसततंनित्यंनियमान्बुधः॥यमान्पतत्यकुर्वाणोनियमान्केवलान्भजन्निति
॥बुद्ध्यायमनियमौसमीक्ष्ययमबद्धलेषुयत्नेषुबुद्धिमनुसंदधीत॥आसनप्राणा
यामप्रत्याहाराख्याताःध्यानधारणासमाधित्रयंमनोविषयत्वात्संप्रज्ञातसमा
धेरंतरंगं॥यमादिकंतुबहिरंगं॥तथाचकेनापिपुण्येनअंतरंगेपथमेत्यध्यसति
बहिरंगलाभायनातिप्रयासःकर्त्तव्यः॥यद्यपितंजलिनाभौतिकभूततन्मात्रेंद्रि
याहंकारविषयाःसंप्रज्ञातसमाधयोबहुधाप्रपंचिताः॥तथापितेषामंतर्ह्यनाका

रणगमनादिसिद्धिहेतुतयामुक्तिहेतुसमाधिविरोधित्वान्नास्माभिस्तत्रादरःक्रियते॥
॥तथाचोक्तंवासिष्ठे॥श्रीरामउवाचजीवन्मुक्तशरीराणांकथमात्मविदांवर॥शक्त
योनेहदृश्यंतेआकाशगमनादिकाः॥१॥वसिष्ठउवाच॥अनात्मविदमुक्तोपिसिद्धि
जालानिवांछति॥द्रव्यमंत्रक्रियाकालयुक्त्याप्राप्तेवराघव॥२॥नात्मज्ञस्येषविषयआ
त्मज्ञोह्यात्मनात्मदृक्॥आत्मनात्मनिसंतुष्टोनाविद्यामनुधावति॥३॥येकेचनजगद्भ्रा
न्तानविद्यामयान्विदुः॥कथंतेषुकिलात्मज्ञस्त्यक्त्वाविद्यानिमज्जति॥४॥द्रव्य
मंत्रक्रियाकालयुक्तयःसाधुसिद्धिदाः॥परमात्मपदज्ञानेनोपकुर्वंतिकाश्चनेति॥५॥
आत्मविषयस्तुसंप्रज्ञातसमाधिर्वासनाक्षयस्यनिरोधसमाधेश्चहेतुःतस्मात्तत
त्रादरःकृतः॥अथपंचभूमिकारूपश्चित्तस्यनिरोधलक्षणःसमाधिःनिरूप्यते॥तंच

समाधिंसूत्रयति"व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधलक्षणचित्तान्व
योनिरोधःपरिणामइति॥व्युत्थानसंस्काराःसमाधिविरोधिनः॥तेचनिरोधहेतुनायो
गिप्रयत्नेनप्रतिदिनंप्रतिक्षणंचाभिभूयंते॥तद्विरोधिनश्चसंस्काराःप्रादुर्भवंति॥तथा
सतिनिरोधएकैकस्मिन्क्षणेचित्तमनुगच्छति॥सोयमीदृशश्चित्तस्यपरिणामोभवति
यदातदाअसंप्रज्ञातसमाधिरुच्यतइत्यर्थः॥एतत्समाधिद्वयंजीवन्मुक्तस्येवसंभवति
नान्यस्येतिमनसिनिधायप्रथमं जीवन्मुक्तस्वरूपंप्रतिपादयितुंप्रतिजानीते॥अथ
जीवन्मुक्तस्यलक्षणमुच्यते॥तस्यलक्षणमाह॥जीवन्मुक्तोनामेत्यादिनाब्रह्मनि
ष्ठइत्यंतेन॥जीवन्मुक्तोनामस्वरूपाखंडब्रह्मज्ञानेनतदज्ञानबाधनद्वारास्वस्वरू ६३
पाखंडेब्रह्मणिसाक्षात्कृतेअज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपिबाधि

तत्वादखिलबंधरहितोब्रह्मनिष्ठः॥अत्राखिलबंधरहितोब्रह्मनिष्ठोजीवन्मुक्तइति
॥तस्यलक्षणंजीवतःपुरुषस्यकर्तृत्वभोक्तृत्वसुखदुःखलक्षणोऽखिलोपाधिश्चित्त
धर्मःसत्तेत्यारूपत्वात्बंधोभवति॥तेनरहितःपरित्यक्तबंधनःब्रह्मणिनिष्ठात
देकपरतायस्यसःब्रह्मनिष्ठःजीवन्मुक्तइत्यर्थः॥सकलबंधरहित्येहेतुमाह॥स्व
स्वरूपेति॥गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेनमूलाज्ञानतत्कार्यसंचितक
र्मादीनामपिबाधितत्वात्सर्वबंधरहित्यमुपपद्यतइत्यर्थः॥तथाचश्रुतिः॥भि
द्यतेहृदयग्रंथिःछिद्यंतेसर्वसंशयाःक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे३
ति॥नन्वेतादृशस्यजीवन्मुक्तस्यदेहेंद्रियादिभानमस्तिनवेत्याशंक्यदग्धपट्या
येनइंद्रजालनिर्मितसौधसमुद्रादिवच्चबाधितानुवृत्त्यामिथ्यात्वेनभानेपिपरमा

र्थतयाभानंनेत्याह॥अयमित्यादिनानपश्यतीत्यंतेन॥अयंतुसुछानसमयेमांसशो
णितमूत्रपुरीषादिभाजनेनशरीरेणओंध्यमांद्यपंगुमोग्ध्यापदुत्वादिभाजनेनइं
द्रियग्रामेणअन्नापिपासाशोकमोहादिभाजनेनअंतःकरणेनचपूर्वपूर्ववास
नयाक्रियमाणानिकर्माणिभुज्यमानानिज्ञानाविरुद्धारब्धफलानिचपश्यन्नपिबा
धितत्वात्परमार्थतोनपश्यति॥यथाइंद्रजालमिति॥ज्ञानवान्तदिदंइंद्रजालं
पश्यन्नपिपरमार्थमिदमितिनपश्यति॥तद्वत्तत्वविदिदंनपश्यतीत्यर्थः॥अस्मि ६४
न्नर्थेस्मृतिमाह॥सचक्षुरचक्षुरिवसकर्णोऽकर्णइत्यादिश्रुतेः॥आचार्यवचनंप्रमाणय
तितत्रकंच॥सुषुप्तिवज्जाग्रतियोनपश्यतिहयंतुपश्यन्नपिचाहयंततः॥तथाचकुर्वन्न
पिनिःक्रियश्चयःसआत्मविन्नान्यइतीहनिश्चयः॥१॥इहजगतिसएवात्मविन्नान्यइ

तिमेनिश्चयइत्यन्वयः।सःकइत्यपेक्षायामाह॥यइति॥यःकोपिमहापुरुषोब्रह्मात्मैक
त्वसाक्षात्कारेणनिरस्तसमस्तभेदबुद्धिःसुषुप्तावस्थायांयथाद्वैतंनपश्यति॥तथाब्रह्म
दृष्टिर्द्वैतंनजाग्रदवस्थायामपिद्वैतंनपश्यति॥तत्तद्दृष्ट्वाब्रह्मव्यतिरिक्तजडपदार्थो
भावात्सतथोक्तः॥किंच॥कदाचित्सुप्तोत्थानदशायामविद्यकसंस्कारलेशावशा
त्स्नानभोजनादिव्यवहारेणद्वयंपश्यन्नपिसमाध्यभ्याससामर्थ्यवशादद्वयत्वेनपश्य
ति॥सचतथोक्तः॥यश्चलोकसंग्रहार्थंनित्यादिकर्माणिकुर्वन्नपिआत्मनिकर्तृत्वा
भावनिश्चयेननिःक्रियःकर्मरहितोभवति॥कर्मफलेननलिप्यतेसजीवन्मुक्तोनात्र
संशयःकर्तव्यइत्यर्थः॥तत्रचस्यजीवन्मुक्तस्ययोगीश्वरस्यममपुण्यपापलेपोनास्ती
त्यभिमानवशाद्यथेष्टाचरणसंगमाशंकापरिहरति॥अस्यज्ञानात्पूर्वंविद्यमाना

नामेवंआहारविहारादीनामनुवृत्तिर्वछुभवासनानामेवानुवृत्तिर्भवति॥अस्य पू
र्वोक्तजीवन्मुक्तस्यज्ञानात्प्रागेवशांत्यादिगुणैरशुभवासनायानिवारितत्वात्॥संसा
रदशायामप्ययत्नेनआहारादिप्रवृत्तिवत्तत्त्वज्ञानोत्तरमपिशुभानामेववासनानामनु
वृत्तिर्भवतिनाशुभानामित्यर्थः॥ननुशुभवासनानुवृत्तेरपिप्रयोजनाभावात्किंतदनुवृ
त्त्येत्यतआह॥शुभाशुभयोरौदासीन्यंवा॥तस्माज्जीवन्मुक्तस्ययथेष्टाचरणप्रसंगोनास्तीति
भावः॥अस्मिन्नर्थेप्रांतरंसंवादयति॥तदुक्तं॥बुधाद्वैनसतत्त्वस्ययथेष्टाचरणंयदि॥शु
नांतत्वदृशांश्वपचकोभेदोऽशुचिभक्षणइति॥॥जीवन्मुक्तस्यब्रह्मज्ञानित्वाभिमानोनास्ती
त्यत्रापिसंमतिमाह॥ब्रह्मविन्नैवथामुक्तासआत्मज्ञानचेतरइति॥ननुविदुषांयथेष्टाचर
णप्रसंगोनास्तीत्युक्तंतदनुपपन्नं॥नमात्रवधेननपित्रवधेन॥यस्यनाहंकृतोभावोबुद्धिर्य

नि

स्यनलिप्यते॥हत्वापिसइमांल्लोकान्न हंतिनबध्यतेइति॥१॥हयमेधसहस्राण्यथकुरु
तेब्रह्महत्यालक्षाणि॥परमार्थविन्नतत्पुण्यैर्नचपापैर्लिप्यतेमनुज्ञः॥अश्वमेधसहस्राणि
ब्रह्महत्याशतानिच॥कुर्वन्नपिनलिप्येतयद्येकत्वंप्रपश्यति॥२॥सभयाद्भयंप्राप्तस्तद्
र्थंयततेचयः॥सपुनःसभयंगंतुंस्वतंत्रश्चेन्नहीच्छति॥३॥आरब्धकर्मनानात्वाद्बुधाना
मन्यथाऽन्यथा॥वर्त्तनंतेनशास्त्रार्थभ्रमितव्यंनपंडितैरित्यादिश्रुतिस्मृत्यभियुक्तानांवि
दुषांयथेष्टाचरणत्वांगीकारादितिचेत्सत्यं॥तेषांवचनानांविदूत्तुतिपरत्वेनतत्कर्त्तव्य
मित्यत्रतात्पर्याभावात्॥तदुक्तमाचार्यैः॥अधर्मोज्जायतेऽज्ञानंयथेष्टाचरणंततः॥धर्मका
र्यैकथंतस्याद्यत्रधर्मोविनश्यतीति॥ननत्वेवं अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं
मित्यादिस्मृत्युक्तसाधनस्यअद्वेषसर्वभूतानामित्यादिवचनैःप्रतिपाद्यमानाऽद्वेषृत्वादि

गुणसमूहस्यचविविदिषांसंपाद्यमानत्वश्रवणात्तेनसहविरोधमाशंक्य॥अमानित्वादि
संपादनस्यविविदिषासन्यासविषयत्वाद्विद्वषांतुलक्षणत्वेनालंकारवदनुवर्त्तनाद्विरो न
धइत्याह॥तदानीममानित्वादीनिज्ञानसाधनानिअद्वेष्टृत्वादयःसद्गुणाश्चालंकारवदनु
वर्त्तंते॥जीवन्मुक्तावस्थायामित्यर्थः॥अस्मिन्नर्थेवार्त्तिकसंमतिमाह॥तदुक्तं॥उत्पन्नात्मा
वबोधस्यह्यद्वेष्टृत्वादयोगुणाः॥प्रयत्नतोभवंत्यस्यनतुसाधनरूपिणः॥अस्यविद्वत्सं
न्यासिनोजीवन्मुक्तस्यअद्वेष्टृत्वादयोगुणाःअप्रयत्नेनस्वतएवभवंति॥नतुसाधनरूपि ६६
णः॥तंप्रतितेसाधनरूपाःनभवंति॥तत्रहेतुमाह॥उत्पन्नेति॥यतउत्पन्नआत्मावबोधोब्र
ह्मात्मैकत्वनिश्चयरूपःततःतस्यतेगुणाः लक्षणत्वेनैवभवंतीत्यन्वयः॥इयताप्रबंधेनपति
कादितेस्मिन्वेदांतसाराख्येग्रंथेश्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानंदयो

गींद्रेणमहापुरुषेणाथवेदांतोनामेत्यारभ्यसाधनचतुष्टयसंपन्नस्यप्रमातुरधिकारि
णःमूलाज्ञाननिवृत्तिपरमानंदप्राप्तिसिद्ध्येप्रतीयमानाविद्यकसकलप्रपंचजातस्य
ब्रह्मण्यध्यारोपापवादप्रकारःसरंसविस्तरंनिःप्रपंचत्वंप्रतिपाद्यतत्साधनंचश्रवणा
दिकंसप्रपंचमभिधास्यतस्यैवाधिकारिणःतत्त्वमस्यादिवाक्यश्रवणानंतरंब्रह्मात्मैक
त्वसाक्षात्कारेणनिरस्तसमस्तभेदबुद्ध्याजीवन्मुक्तत्वंपदर्शितं॥एतावतैवकार्यसिद्धेः
किंबहुलेखनेनेतिमनसिनिधायसंप्रत्यस्यैवजीवन्मुक्तस्यस्वप्रकाशात्मानंदानुभ
वैकनिष्ठस्यभेदप्रतीत्यभावेपिअविद्यालेशावशात्प्रारब्धंकर्म . . . भुंजानोपिक्षु
त्तृष्णादिदेहयात्रामात्रक्रियावन्निष्ठिन्नलीलतएवावतिष्ठतेइत्युपसंहरति॥किंबहुने
त्यादिना॥किंबहुनाअयंदेहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्राप्तानिसुखदुःखलक्ष

णानिआरब्धफलान्यनुभवन्नंतःकरणाभासादीनामवभासकःसन्नदवसानेप्रत्यगानं
पेदेब्रह्मणिप्राणेलीनेसति अज्ञानतत्कार्यसंस्काराणामपिविनाशात्परमकैवल्यमा
नंदैकरसमखिलभेदप्रतिभारहितमखंडंब्रह्मावतिष्ठते॥आरब्धंत्रिविधं॥स्वेछाकृतं।
परेछाकृतंअनिछाकृतंचेति।व्युत्थानदशायामीश्वरप्रेरितयास्वकीयेछयाकृतंस्वेछाकृ
तंभिक्षाटनादि॥समाध्यवस्थायांशिष्यादिभिःदीयमानमन्नादिकंपरेछाकृतं॥समाध्यवस्था
यांव्युत्थानदशायांवा॥आकाशफलपातवदकस्मात्जायमानंपाषाणपतनकंटकवेधादि
कमनिछाकृतं॥सचायंजीवन्मुक्तःप्राक्तनत्रिविधप्रारब्धप्राप्तंसुखदुःखमनुभवन्बु
ध्यादिसाक्षितयासर्वावभासकःसन्भोगेनारब्धकर्मक्षयेसतिप्रत्यगभिन्नपरमात्मनि ६
प्राणादिलयानंतरंप्रनष्टाविद्यकसंसारःकृतकृत्यःसन्गलितसकलभेदप्रतिभासोत्रैवा

वतिष्ठतेइतिसकलवेदरहस्यतात्पर्यमित्यर्थः॥अयंजीवन्मुक्तोघटाद्युपाधिविलयेस
तिघटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्तइत्युपचारव्यवहारभाग्भवति॥बहुत्वस्याप
वास्तवत्वात्॥तदुक्तंआचार्यैः॥ननिरोधोनचोत्पत्तिर्नबंधोनचसाधकः॥नमुमुक्षुर्नवा
मुक्तइत्येषापरमार्थताइति॥अस्यजीवन्मुक्तस्यउपाधिविगमसमयेप्राणाख्यंलिंगशरीरं
अनितप्तलोहक्षिप्तनीरबिंदुवत्त्वत्यगभिन्नपरमानंदेलीनत्वात्स्थूलशरीरंनोत्क्रा
मतीतिअत्रश्रुतिमाह॥ननस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंते।विमुक्तश्चविमुच्य
इत्यादिश्रुतेः॥अयंजीवन्मुक्तोजीवन्नेवदृश्यमानाद्रागद्वेषादिबंधनात्विशेषेण
मुक्तःसन्वर्त्तमानदेहपातेसतिभाविदेहबंधात्विशेषेणमुच्यतेइत्यत्रापिश्रुतिमा
ह।विमुक्तश्चेति॥बृहदारण्यकेपि॥यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः॥अथम

र्योमतोभवत्यत्र ब्रह्मसमश्नुतइति॥वासिष्ठेपि॥जीवन्मुक्तपदंत्यक्त्वास्वदेहेकालसात्कृते॥
भवत्यदेहमुक्तत्वंपवनोस्पंदतामिवेति॥असंगोह्ययंपुरुषः॥आकाशवत्सर्वगतश्चनि
त्यःअत्राविलंक्षुद्रमपापविद्धमित्यादिश्रुत्याप्रत्यगात्मनोनित्यत्वपरिपूर्णत्वकूटस्थत्व
श्रवणात्॥उत्पाद्याप्तिविकृतिसंस्कारचतुर्विधक्रियाफलविलक्षणत्वेनविद्ययानित्यमि
दृन्नाविद्यानिवृत्तिमात्रेणप्राप्तएवात्मापुनःप्राप्तइत्युपचर्यते॥अधिष्ठानस्यगमनागम
नाभावेअध्यस्तस्यलोकांतरगमनायोगान्नसालोक्यादिमुक्तिसंभवः॥नचाप्राप्तस्यक्रिया
साध्यस्यवस्तुनोविद्यमानानर्थनिवृत्तेश्चपुरुषार्थत्वंदृष्टं॥अत्रतद्भावात्कथंपुरुषा
र्थत्वमितिचेत्॥तयोरेवपुरुषार्थत्वमितिनियमाभावात्॥स्वछायायामारोपितरक्षसो
विस्मृतकंठगतचामीकरस्यभ्रांतपुरुषस्यआप्तवाक्येनयोनिवृत्त्याशोरपिपुरुषार्थ

त्वदृष्टेः॥अत्रसंग्रहः॥आत्मज्ञानमलंनिरस्तममलंप्राप्तंचनत्वंपरंकंवस्याभरणादिव
तत्रभवज्ज्ञानच्छायापिज्ञातीयथा॥आप्तोक्त्यानिवृत्तिवच्छ्रुतिस्तिरोधाकात्तुगुरोरु
स्थितात्यधस्तधांतनिरासतःपरसुखंप्राप्नुतयोरुच्यतेइति॥नचमुक्तानामपिवसि
ष्ठादीनामपरोक्षज्ञानिनोपुनर्देहांतरश्रवणात्केवलज्ञानोत्पत्तिसमयएवा
वाक्यज्ञानमस्माकंमुक्तिर्भवतिइतिकथंविश्वसिमः॥अतोज्ञानव्यतिरिक्तमप्युपायां
तरंकिंचित्कर्तव्यमितिवाच्यं॥शास्त्रप्रामाण्यादेवतदुपपत्तेः॥ब्रह्मविद्ब्रह्मैवभ
वति॥तरतिशोकमात्मविदित्यादिश्रुतिभिःज्ञानोत्पत्तिसमयमेवमुक्तिप्रतिपादना
त्॥नदुःखंनोषेण॥तीर्थश्वपचगृहेवानष्टस्मृतिरपिपरित्यजन्देहं॥ज्ञानसमका
लमुक्तःकैवल्यंयातिहनशोकइति॥वसिष्ठादीनांतत्राधिकारिकपुरुषत्वेनयावदधिका

रंभारब्धवेगधयुक्त्याधादिनास्वीकृतावांतरदेहपाते पित्तन्देहनाविभोगस्यनिवार
यितुमशक्यत्वात्प्रारब्धस्यविनाभोगेनक्षयानुपपत्तेः॥यावदधिकारमवस्थितिराधिका
रिणामितिभगवत्व्यासैर्विन्नोषितत्वात्॥अस्मदादीनांचप्रारब्धकर्मणअनेकदेहारं
भकत्वसंभवेपिचरमदेहंनाअपरोक्षज्ञानोत्पत्तेरसंभवात्॥वामदेवेत्तथाहृष्टत्वात्
॥अन्यथागर्भस्थस्यश्रवणाद्यभावेनज्ञानोत्पत्त्यनुपपत्तेः॥ननुज्ञानिनामपिस्वप्नाव
स्थायांदेहांतरस्वीकारवन्मुक्तानामपिपुनः देहांतरस्वीकारःकिंनस्यादितिचेत्न॥ने
त्थंजागरितेविद्याकंठेस्वप्नंसमाविशत्॥सुषुप्तेहृदयस्थंतुतुरीयंमूर्धनिस्थितं॥कंठे
स्वप्नंसमाविशदित्यादिवाक्येषुकंठगतनिर्गमनाभावश्रवणात्॥देहांतरप्राप्तेस्तुतदनं
तरप्रतिपन्नाविद्यत्रदेहात्निर्गमनश्रवणात्वैषम्यमिति॥तदुक्तंस्कांदेयस्मिन्देहेहृ

ढंज्ञानमपरोक्षंविजायते॥तद्देहपातपर्यंतमेवंसंसारदर्शनं॥१॥उराणिनास्तिसंसारदर्श
नेपरमार्थतः॥कथंतद्दर्शनंदेहविनाशाद्वैमुच्यते॥२॥तस्मात्ब्रह्मात्मविज्ञानंदृढंचर
मविग्रहे॥जायतेमुक्तिदंज्ञानंप्रसादादेवमुच्यतइति॥३॥तस्मात्सुष्ठुकंविमुक्तश्चविमुच्य
तइति॥नित्यशुद्धपरिपूर्णमद्वयंसच्चिदात्मकमखंडमक्षरं॥सर्वदासुखमबोधतल्कृतैर्वर्जितंस
दहमस्मितत्परं॥१॥गोवर्द्धनेश्वरणयाविमुक्तक्षेत्रेपविद्वेनरसिंहयोगी॥वेदांतसारस्यचकारटी
कांसुबोधिनींविश्वपतेःपुरस्तात्॥२॥जातेपंचशताधिकेदशशतेसंवत्सराणांपुनःसंज्ञाते
दशावत्सरेप्रभुवरश्रीशालिवाहांकके॥प्राप्तेदुर्मखवत्सरेचतिथौचैमासेनुमत्यांतिथौप्राप्तेभा
र्गववासरेनरहरिःटीकांचकारोज्ज्वलां३॥ ॥इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानं
दभगवत्पूज्यपादशिष्यनृसिंहसरस्वतीकृतावेदांतसारटीकासमाप्ता॥ ॥शुभं॥ वे·हरिहर

वेदां॰टी॰ ॥ ॥इतिश्रीपरमहंसपरिव्राजकाचार्यसदानंदविरचितोवेदांतसारःसमाप्तः॥ ॥श्रीः॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिवेदांतसारःसमाप्तः॥पत्र७०॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY